रीतिः सतत्त्वं संसिद्धिः निसर्गः शीलमस्त्रियाम् ॥ २२४ ॥
[3]गुणोत्कर्षः परभागो;[4] दशाऽवस्था स्थितिस्तथा ।
[5]अस्त्रियौ स्नेहप्रेमाणौ हार्दं प्रीति[6]रथो पुमान्॥ २२५ ॥
समाधिः प्रणिधानं चावधानं धानमित्यपि ।
समार्थी[7]वथानुपश्चाद्भ्यां तापश्चाऽनुशयस्तथा ॥ २२६ ॥
विप्रतीसारो;[8] दाक्षिण्यं द्वितीयमनुकूलता ।
[9]पुण्यं श्रेयो वृषो धर्मः सुकृतं;[10] नियतिर्विधिः ॥ २२७ ॥
दिष्टं भाग्यं तथा भागधेयं दैवं त्वदोऽस्त्रियाम् ।
[11]शुभं दैव[13a] मयोऽदन्तो, [12] निर्ऋतिः कालकर्णिका ॥२२८॥
अलक्ष्मी[13]रथांहः पापं दुष्कृतं कल्मषं तमः ।
दुरितं किल्बिषं कल्कमस्त्रियां वृजिनं पुनः ॥ २२९ ॥

१ ३५२ दोष नाम त्रयं ॥
२ ३५३ सहज सभाव नाम चतुर्दश ॥
३ ३५४ गुणोत्कर्ष नाम द्वयं ॥
४ ३५५ अवस्था नाम त्रयं ॥
५ ३५६ प्रीति नाम चत्वारि ॥
६ ३५७ चित्तैकाग्र नाम चत्वारि ॥
७ ३५८ पछतावा नाम चत्वारि ॥
८ ३५९ दाक्षिण्यपणा नाम द्वयं ॥
९ ३६० पुण्य नाम पंच ॥
१० ३६१ पूर्वकर्मविपाक नाम षट् ॥
११ ३६२ भलाभाग्य नाम एकं ॥
१२ ३६३ लक्ष्मीरहितपणा नाम त्रयं ॥
१३ ३६४ पापरा नाम सप्तदश ॥

२२५.२) अस्त्रियो, हार्दे
२२६.१) धानं = ध्यानं .२) समांतो ऽथानुपश्चभ्यातां
२२७.१) Normally विप्रतिसार

अघं पङ्कोऽस्त्रियां किण्वमेनः कलुषमित्यपि ।
पातकोऽस्त्री पुमान् पाप्मा स्यादशुभं नपुंसके ॥ २३० ॥
[1]धर्मार्थकामास्त्रिवर्गः;[2] चतुर्भद्रं बलान्विताः ।
[3]मोक्षयुक्ताश्चतुर्वर्गः;[4] उपाधिर्धर्मचिन्तनम् ॥ २३१ ॥
[5]छन्दोऽदन्तो मतं भावोऽस्त्रियामाकूतमाशयः ।
अभिप्रायो[6]ऽथ प्रमादस्तथैवानवधानता ॥ २३२ ॥
[7]स्रोतः क्लीबेऽक्षकरणे खं हृषीकं तथेन्द्रियम् ।
विषयी नन्तः;[8] स्पर्शनादिकं बुद्धीन्द्रियं स्मृतम् ॥ २३३ ॥
[9]क्रियेन्द्रियं स्यात्पाण्यादिकं;[10] पञ्च स्पर्शादयोऽप्यथ ।
गोचरा विषया इन्द्रियार्थाः;[11] शिशिरशीतलौ ॥ २३४ ॥
शीतस्तुषारः सुशीमो हिमो जड इमे समे ।
गुणे पुंसि वाच्यलिङ्गास्तद्वति स्युस्तथाऽपरे ॥ २३५ ॥
[12]तीव्रस्तीक्ष्णः उष्णतिग्मौ चण्डः पटुखरावपि ।
[13]ईषदुष्णः कदुष्णश्च मन्दोष्णः कोष्णः पञ्चमः ॥ २३६ ॥
कवोष्णो[14]ऽथ दृढः क्रूरः कर्कशः कठिनः खरः ।
कठोरो जरठो निष्ठुरः परुषश्च कक्खटः ॥ २३७ ॥

---

१ ३६५ धर्मार्थकामत्रयाणां एकोक्त्या नाम एकं ॥
२ ३६६ चतुर्भद्र नाम एकं ॥
३ ३६७ चतुर्वर्ग नाम एक ॥
४ ३६८ धर्मचिंतन नाम एक ॥
५ ३६९ मन अभिप्राय नाम षट् ॥
६ ३७० प्रमाद नाम द्वयं ॥
७ ३७१ इंद्रिय नाम सप्त ॥
८ ३७२ बुद्धींद्रिय नाम ॥
९ ३७३ क्रि[या] इंद्रिय नाम एकं ॥
१० ३७४ इंद्रिय विषय नाम त्रयं ॥
११ ३७५ शीतलगुण नाम सप्त ॥
१२ ३७६ उष्णगुण नाम सप्त ॥
१३ ३७७ थोडुं उष्ण नाम पंच ॥
१४ ३७८ कठोरगुण नाम दश ॥

२३१·१) °कामत्रि° २३७·२) करकटः
२३५·१) रामे for समे

[1]अकर्कशः सुकुमारो मृदुलः कोमलो मृदुः।
सुमालो;[2] मधुरो गुल्यो रसज्येष्ठो मधूलकः॥ २३८॥
स्वादुः[3] [13b] पाचनोऽम्लो दन्तशठः;[4] सर्वरसः सरः।
लवणो;[5]ऽथ कटुर्भूय उषणो मुखशोधनः॥ २३९॥
[6]तिक्तो वक्त्रभेदी नन्तः;[7] कषायस्तुवरो रसाः।
[8]गन्धो;[9] जनमनोह्लादी भवेत्स घ्राणतर्पणः॥ २४०॥
निर्हारी च समाकर्षी सुरभिः;[10] स विदूरगः।
आमोदो; [11]यो विमर्दोत्थः स परिमल आहृतः॥ २४१॥
[12]अथेष्टगन्ध आमोदी सुगन्धिर्मुखवासनः।
[13]दुर्गन्धः पूतिगन्धश्च;[14] विस्रं स्यादामगन्धि यत्॥ २४२॥
[15]वर्णाः श्वेतमुखाः सर्वे[16]ऽथ शुक्लो धवलोऽर्जुनः।
अवदातः शुचिर्गौरो वलक्षो हरिणः सितः॥ २४३॥
पाण्डुरो विशदः पाण्डुः श्वेतः शुभ्रश्च पाण्डरः।
श्येतः;[17] स धूसरो ज्ञेय ईषत्पाण्डुर्भवेद्यकः॥ २४४॥

---

१ ३७९ सुकुमारगुण नाम षट्॥
२ ३८० मधुरगुण नाम पंच॥
३ ३८१ षाटा [13b] गुण रस त्रयं॥
४ ३८२ लवणरसगुण नाम त्रयं॥
५ ३८३ कटुकरसगुण नाम त्रयं॥
६ ३८४ तीषा रसगुण नाम द्वयं॥
७ ३८५ कसाइला रसगुण नाम द्वयं॥
८ ३८६ रसा समाप्ताः॥ सामान्य गंध नाम एकः॥
९ ३८७ सुरभि गंध नाम चत्वारि॥
१० ३८८ दूरहुंति आगत सुरभि गंधगुण नाम एकः॥
११ ३८९ सरीरसंबंध करी फूल मर्दित हुंती ऊपना सुगंधगुण नाम एक॥
१२ ३९० सुगंधगुण नाम चत्वारि॥
१३ ३९१ दुर्गंधगुण नाम द्वयं॥
१४ ३९२ मलगंध नाम एक॥
१५ ३९३ गंधः समाप्तः॥ सामान्य वर्ण नाम एक॥
१६ ३९४ धवलवर्णगुण नाम षोडशः॥
१७ ३९५ धूसरा वर्णगुण नाम एक॥

२४०.१) वक्रभेदी
२४१.१) समाकार्षी
२४३.१) स्वेतमुखाः
२४४.२) श्वेतः for श्येतः

[1]कपोताभः कपोतश्च;[2] गौरः स्यात्पीतरञ्जनः ।
हारिद्रः पीतलः पीतः;[3] पालाशो हरितो हरित् ॥ २४५ ॥
[4]पीतनीलस्तालकाभो[5] माञ्जिष्ठो रक्तरोहितौ ।
लोहितः शोणो;[6] यः श्वेतरक्तः स्यात्स तु पाटलः ॥ २४६ ॥
[7][14a] बालसन्ध्यारुचिर्यः स्यादरुणः स निगद्यते ।
[8]पीतरक्तो हरिः श्यावः पिशङ्गः पिङ्गपिञ्जरौ ॥ २४७ ॥
पिङ्गलः कपिलो बभ्रुः कडारकपिशौ तथा ।
कद्रुः;[9] नीलोऽसितः श्यामः श्यामलो मेचकः शितिः ॥ २४८ ॥
कृष्णः कालः पुना रामो;[10] रक्तश्यामस्तु धूमलः ।
धूम्रो[11]ऽथ कर्बुरश्चित्र एतोऽदन्तश्च चित्रलः ॥ २४९ ॥
समौ किर्मीरकल्माषौ शबलो[12]ऽथ स्वरो ध्वनिः ।
ध्वानः स्वानो रवो नादो निनदो निस्वनः स्वनः ॥ २५० ॥
रणः क्वणः स्वनिर्घोषः क्वाणो निक्वाणनिक्वणौ ।
निनादशब्दनिर्घोषा ह्रादो निह्राद आरवः ॥ २५१ ॥
संरावश्च विरावश्च निःस्वानः क्वणनं पुनः ।
आरावो[13]ऽथ सप्ततन्त्रीकण्ठजाताः स्वरा अमी ॥ २५२ ॥

---

१ ३९६ कपोतवर्णगुण नाम द्वयं ॥
२ ३९७ पीलावर्णगुण नाम पंच ॥
३ ३९८ पीलानीलावर्णगुण नाम त्रयं ॥
४ ३९९ पीलानीला नाम द्वयं ॥
५ ४०० रक्तवर्णगुण नाम पंच ॥
६ ४०१ धवलारातामेलावर्णगुण नाम एक ॥
७ ४०२ संध्या राग समान रक्तवर्णगुण नाम एक ॥ [14 a]
८ ४०३ पीलारातामेलावर्णगुण नाम एकादश॥
९ ४०४ कालावर्णगुण नाम नव ॥
१० ४०५ राताकालावर्णगुण नाम द्वयं ॥
११ ४०६ कावरावर्णगुण नाम सप्त ॥
१२ ४०७ वर्णा समाप्ताः ॥ शब्द गुण नाम सप्तविंशतिः ॥
१३ ४०८ वीणातंति शरीरकंठ ऊपना सात स्वरविशेष नाम सप्त ॥

२४६·१) तालकाभोम मांजिष्ठो
२४८·२) कद्दुं
२५०·२) धानः for ध्वानः
२५१·१) कणः for क्वणः
२५२·१) निश्वान

धैवतो निषधः षड्जो गान्धार ऋषभः पुनः ।
मध्यमः पञ्चमस्ते[1] स्युरुरःकण्ठशिरोभवाः ॥ २५३ ॥
[2]मन्द्रा मध्यास्तथा ताराः;[3] सप्रणादस्तु सीत्कृतम् ।
जातो गुणानुरागाभ्यां शब्दो नृणां स एव च ॥ २५४ ॥
[4]क्रन्दितं रुदितं क्रुष्टं;[5] गद्गदः स उदीरितः ।
तदेवाजातपूत्कारं;[6] पर्दनं गुदजो रवः ॥ २५५ ॥
[7]कर्दनं कुक्षिसंभूतः;[8] सिंहनादस्तथा भवेत् ।
क्ष्वेडा[14b][9]ऽथ क्रन्दनं योधाह्वानं;[10] कोलाहलोऽस्त्रियाम् ॥ २५६ ॥
कलकलो[11] ऽथ तुमलः शब्दो यो व्याकुलो भवेत् ।
[12]हस्तिनां बृंहितं गर्जो;[13]हेषा ह्रेषा तु वाजिनाम् ॥ २५७ ॥
[14]मृगादीनां तिरश्चां च रुतं वासितम[15]प्यथ ।
पक्षिणां कूजितं;[16] रेषा रेषणं स्याद् वृषस्य तु ॥ २५८ ॥

---

१ ४०९ सात स्वरना भेदत्रय नाम त्रयं ॥
२ ४१० ए तीन स्थाने उत्पन्न जे स्वभाव स्वर भजइ ते कहइ ॥
३ ४११ सीसीकार नाम द्वयं ॥
४ ४१२ रोइवा शब्द नाम त्रयं ॥
५ ४१३ हलूआ रोवण नाम एकं ॥
६ ४१४ पाद नाम एकं ॥
७ ४१५ गडवडाट शब्द नाम एक ॥
८ ४१६ सीहनाद नाम द्वयं ॥
९ ४१७ सुभटरा आ [14b] ह्वान नाम एकं ॥
१० ४१८ कोलाहल नाम द्वयं ॥
११ ४१९ आकुलशब्द नाम एक ॥
१२ ४२० हाथीशब्द नाम द्वयं ॥
१३ ४२१ घोडाशब्द नाम द्वयं ॥
१४ ४२२ मृगादिकजीवशब्द नाम द्वयं ॥
१५ ४२३ पंषिना शब्द नाम एकं ॥
१६ ४२४ नाहरशब्द नाम द्वयं ॥

२५४.१) शीकृतं .२) प for स   २५८.१) अथो

[1]बुक्कणं भषण सारमेयस्य;[2] जलदस्य तु ।
रसितं स्वनितं गर्जिः पुमान् ध्वानितगर्जिते ॥ २५९ ॥
स्तनितं चा[3]थ विस्फारो धनुषां;[4] गोरुभे मते ।
हम्भारम्भे;[5] भाजनं स्यात् कीचकानां च[6] टङ्कुरम् ॥ २६० ॥
भेरीनादो[7] मुरजस्य गुन्दलः;[8] प्रक्कणः पुनः ।
प्रक्काणस्तन्त्रीक्कणने:;[9] मणितं रतकूजितम् ॥ २६१ ॥
[10]व्याध्यादिभिः पीडितानां कणितं;[11] मधुरः कलः ।
[12]गम्भीरो मन्द्रः;[13] उच्चैरत्यर्थं तारो निगद्यते ॥ २६२ ॥
[14]कलः सूक्ष्मः काकली स्त्री;[15] त्वेकतालो लयानुगः ।
[16]काकुरक्लीवो विकारो ध्वनेः शोकभयादिभिः ॥ २६३ ॥
[17]प्रतिश्रुत् स्त्री प्रतिशब्दे .... ।
[18]स्वास्थ्यं धृतिश्च संतोषः;[19] पूर्वानुभवचिन्तनम् ॥ २६४ ॥

---

१ ४२५ कुत्ताशब्द नाम द्वयं ॥
२ ४२६ मेहगाज नाम षट् ॥
३ ४२७ धनुष नाम एक ॥
४ ४२८ गाइशब्द नाम द्वयं ॥
५ ४२९ वंशशब्द नाम एकं ॥
६ ४३० भेरीशब्द नाम एकं ॥
७ ४३१ मादलशब्द नाम एकं ॥
८ ४३२ वीणाशब्द नाम द्वयं ॥
९ ४३३ मैथुनशब्द नाम एकं ॥
१० ४३४ पीडायुक्त मनुष्यशब्द नाम एकं ॥
११ ४३५ मधुर शब्द नाम एकं ॥
१२ ४३६ गंभीर शब्द नाम एकं ॥
१३ ४३७ उंचा शब्द नाम एकं ॥
१४ ४३८ मधुर झीणा शब्द नाम एकं ॥
१५ ४३९ अभिन्न कालमान शब्द नाम द्वयं ॥
१६ ४४० ध्वनिविकार नाम एकं ॥
१७ ४४१ पडसाद नाम द्वय ॥
१८ ४४२ समाप्ता रूपरसगंधस्पर्शशब्दाः ॥ संतोष नाम त्रयं ॥
१९ ४४३ चीतारवा नाम त्रयं ॥

२५९·१) बुक्वणं
२६०·२) हंभरभे Hem. reads क्षीजनं for भाजनं
२६१·१) मरजस्य ·२) better रति°
२६३·२) धनेः
२६४·१) latter half omitted by the scribe.

स्मरणं स्मृतिराध्यानं;[1] स्याद्बुद्धिर्धि[15a]षणा मतिः ।
प्रज्ञाप्रतिभाप्रतिपत्प्रेक्षासंवित्तिचेतनाः ॥ २६५ ॥
उपलब्धिः शेमुषी चिन्मनीषाज्ञातिदृष्टयः ।
धी[2]र्या तु धारणशक्ता मेधा सा प्रोच्यते बुधैः ॥ २६६ ॥
[3]तत्त्वदृष्टिर्भवेत्पण्डा; [4]ज्ञानं मोक्षफला मतिः ।
[5]विज्ञानमन्यशास्त्रादाव[6]थाष्टौ धीगुणा यथा ॥ २६७ ॥
शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं;[7] त्रपा पुनः ॥ २६८ ॥
ह्रीर्लज्जा व्रीडा मन्दाक्षं;[8] परतः सात्वऽपत्रपा ।
[9]जाड्यं मौर्ख्यं; पुनः[10] सादोऽवसादस्तु विषण्णता ॥ २६९ ॥
विषादो;[11] मद आनन्दमोहयोः संगमो भवेत् ।
[12]आधारो(?)गह्वरो व्याधिः;[13] निद्रा शयनसंलयौ ॥ २७० ॥
प्रमीला स्वापः संवेशो नन्दीमुखी च तापसी ।
श्वासहेतिः पुनस्तन्द्रा;[14] साऽधिका सुखसुप्तिका ॥ २७१ ॥
सुप्तं सुष्वाप;[15] औत्सुक्यं हृल्लेखोत्कलिके पुनः ।
रणरणक उत्कण्ठा रतिरायल्लकस्तथा ॥ २७२ ॥

---

१ ४४४ बुद्धिरा नाम षोडश ॥
२ ४४५ सूत्रार्थग्रहणसमर्थबुद्धि नाम एकं ॥
३ ४४६ तत्त्वगामिनी बुद्धि नाम एकं ॥
४ ४४७ मोक्षदायक बुद्धि नाम एकं ॥
५ ४४८ चित्रशिल्पिकलादिकव्यापिनी मति नाम एकं ॥
६ ४४९ आठबुद्धिरा गुण कहइछइ ॥
७ ४५० लाज नाम पंच ॥
८ ४५१ बीजा मनुष्यथी लज्जा ऊपनी तन्नाम एकं ॥
९ ४५२ मूर्षपणारा नाम द्वयं ॥
१० ४५३ विषवाद नाम चत्वारि ॥
११ ४५४ महूआपणा नाम एकं ॥
१२ ४५५ डींभा नाम एकं ॥
१३ ४५६ नींद्र नाम दश ॥
१४ ४५७ घोरनींद नाम त्रयं ॥
१५ ४५८ उत्कंठा नाम सप्त ॥

२६९.१) सात्त्वऽपत्रण   २७२.१) कत्सुक्यं

[1]अक्लीबोऽवहित्थाकारगूहने गृहजालिका ।
अवकटिकाऽवकुटारिका;[2] शङ्का तु सा मता ॥ २७३ ॥
संभावनमनिष्टस्य;[3] चापलं चानवस्थितिः ।
[4]कौसीद्यं तन्द्रा आलस्यं चा[ऽऽ]नन्दो हर्षमुदौ तथा ॥ २७४ ॥
चित्तप्रसन्नता[15b]प्रीतिः प्रमोदामोदसंमदाः ।
आन[न्द]थुः पुमान् ह्लादः प्रमोदो[5] ऽथावलिप्तता ॥ २७५ ॥
स्युरभिमानाहंकारगर्वाः पुंसि परेऽस्त्रियाम् ।
मानोऽस्त्री ममता दर्पः स्मयश्चित्तोन्नतिस्तथा ॥ २७६ ॥
[6]साऽहमहमिका या तु स्पर्धनं क्रियते मिथः ।
[7]अहोपुरुषिका गर्वात् या स्वात्मनि विचारणा ॥ २७७ ॥
[8]अहंपूर्वमहंपूर्वमित्यहंपूर्विका तथा ।
[9][10]उग्रत्वं चण्डता;[11] ग्लानिः स्त्रियां च बलहीनता ॥ २७८ ॥
[12]प्रबोधः स्याद्विनिद्रत्वं;[13] दैन्यं कार्पण्यमप्यथ ।
[14]व्यायामः प्रयासः क्लेशः श्रमः क्लमः परिश्रमः ॥ २७९ ॥
आयासो;[15] वातभूतादि दोषाच्चित्तानवस्थितिः ।
चित्तविप्लव उन्मादः[16]स्त्रास आकस्मिकं भयम् ॥ २८० ॥

१ ४५९ आकारविकारादिक गोपिवा नाम पंच ॥
२ ४६० सीक नाम एकं ॥
३ ४६१ चंचलपणा नाम द्वयं ॥
४ ४६२ आलस नाम त्रयं ॥
५ ४६३ हर्षनाम एकादश ॥
६ ४६४ अहंकार नाम नव ॥
७ ४६५ अहमकपणां नाम एकं ॥
८ ४६६ आपणा मोटापणाना गर्व नाम एकं ॥
९ ४६७ हूं पहिलउ इसा गर्वपणा नाम एकं ॥
१० ४६८ करडाईपणा नाम द्वयं ॥
११ ४६९ बलहीनपणा नाम द्वयं ॥
१२ ४७० जागिवापणा नाम द्वयं ॥
१३ ४७१ कृपणाई नाम द्वयं ॥
१४ ४७२ परिश्रम नाम सप्त ॥
१५ ४७३ चित्तभ्रम नाम द्वयं ॥
१६ ४७४ झबकपणा नाम एकं ॥

२७३.१) °गूहिने
२७९.१) अथो
२८०.१) दोषचित्ता°

[1]गुणो यः क्रोधसंभूतो जिगीषोत्साहवांश्च यः ।
अमर्षः स विजानीया[2]न्मौढ्यमोहौ समौ तथा ॥ २८१ ॥
[3]धातुवैषम्येऽपस्मारः;[4] चिन्ताध्य.न[5]मथाऽत्मनः ।
अवगणनं निर्वेद[6]स्तर्क ऊहो विमर्शनम् ॥ २८२ ॥
उन्नयनं वितर्कोऽस्त्री परामर्शोऽध्याहारकः ।
[7]संवेगः संभ्रमावेगौ त्वरित्तूर्णिः स्त्रियौ त्वरा ॥ २८३ ॥
[8]गुणेषु दोषाविष्कारोऽसूया[9]ऽथास्तं निमीलनम् ।
परलोकगमो नाशो दीर्घनिद्राऽत्ययौ स[16 a]मौ ॥ २८४ ॥
अवसानं कालधर्मः कालः संस्था तथा मृतिः ।
अक्लीबो मृत्युर्दिष्टान्तः पञ्चत्वं निधनं पुनः ॥ २८५ ॥
[10]अस्त्री तत्सर्वगं मारिर्मरकोऽस्त्री;[11] समे त्वमी ।
संचारिणस्त्रयस्त्रिंशद[12]थ रागो रतिः पुनः ॥ २८६ ॥
अनुरागोऽनुरतिः स्यात्;[13] हासिका घर्घरो हसः ।
हास्यं हासो हसनं चा[14]दृष्टदन्ते स्मितं तथा ॥ २८७ ॥

---

१ ४७५ अमरस नाम एकं ॥
२ ४७६ मूर्षपणा नाम द्वयं ॥
३ ४७७ मृगीरोग नाम एकं ॥
४ ४७८ चीतारण नाम द्वयं ॥
५ ४७९ आपणाऽवगणवा नाम एकं ॥
६ ४८० विमासण नाम सप्त ॥
७ ४८१ ऊतावल नाम षट् ॥
८ ४८२ परगुणविषये दोषकहण नाम एकं ॥
९ ४८३ मरण नाम पंचदश ॥
१० ४८४ मिरगी उपद्रव नाम द्वयं ॥
११ ४८५ इतरा स्वास्थ वधकी मांडी (?) मरकपर्यंत तेत्रीस व्यभिचारी भाव कहीजइ ॥
१२ ४८६ हिवइ स्थायि भाव कहइजइ । राग नाम चत्वारि ॥
१३ ४८७ हासा नाम पंच ॥
१४ ४८८ जिण हासइ दांत न दीसइ ते हासा नाम द्वयं ॥

२८१.१) उत्साह वाश्च
२८४.२) °समो for °गमो, अत्ययौ दशमौ
२८६.१) मरगोको for मरको, Verses 288-320 are wrongly numbered as 289-321 respectively

चक्रोष्ठिकाऽपुमां[1]स्तमिन् किञ्चित्प्रेक्षितदन्तके ।
हसितं;[2] किञ्चिच्छ्रुते विहसितं च[3] स्फुरदोष्ठके ॥ २८८॥

हसन[4] माच्छुरितकं हासे सोत्प्रास उच्यते ।
[5]शुक् स्त्रियां शोचनं स्वेदः शोको[6]ऽथ क्रुत् स्त्रियां रुषा ॥ २८९॥
क्रुधा मन्युः पुमान् कोपो रुट् स्त्रियां प्रतिघः समौ ।
रोषक्रोधा[7] वथ प्रौढिरुद्यमः कियदेतिका ॥ २९० ॥
अभियोगोऽध्यवसाय ऊर्ज्जोत्साहौ प्रगल्भता ।
उद्योगः;[8] सात्वतिशययुक्ता वीर्यं[9]मथो भयम् ॥ २९१ ॥
दरोऽस्त्री भीः स्त्रियां भीतिराशंका साध्वसं भिया ।
आतङ्को;[10] यद्भूधवानां राजपुत्रादितो भयम् ॥ २९२ ॥
अहिभय[11]मथो दृष्टं स्वकीयपरचक्रजम् ।
[12]जलानलादितोऽदृष्ट[13]मथ भीमं भयानकम् ॥ २९३ ॥
[16 b] भैरवं दारुणं भीष्मं प्रतिभयं भयावहम् ।
घोरं भयङ्करं भीषणमाभिलं च भासुरम् ॥ २९४ ॥
डमर (?);[14]घृणा जुगुप्सा[15]ऽथ चित्रं मोहविस्मयौ ।
आश्चर्यं कुल्लकं वीक्षं चोद्यमद्भुतमप्य[16]थ ॥ २९५ ॥

---

१ ४८९ कोई एक दंत दीसइ ते हासा नाम एकं ॥
२ ४९० थोडुंसुं सांभलीजइ ते हासा नाम एकं ॥
३ ४९१ सबल हासा नाम एकं ॥
४ ४९२ मसकरी छेकसहित हासा नाम द्वयं ॥
५ ४९३ सोग नाम चत्वारि ॥
६ ४९४ क्रोधरा नाम नव ॥
७ ४९५ सामान्यत उद्यम नाम नव ॥
८ ४९६ आतिशयवंत उद्यम नाम एकं ॥
९ ४९७ भय नामऽष्टौ ॥
१० ४९८ ग्रासीयारा भय नाम एकं ॥
११ ४९९ स्वचक्रपरचक्रथी भय ऊपजइ तन्नाम एकं ॥
१२ ५०० अग्निपाणीथी उत्पन्न भय नाम एकं ॥
१३ ५०१ बीहामणा नाम त्रयोदश ॥
१४ ५०२ जुगुप्सा मूग (सूग) नाम द्वयं ॥
१५ ५०३ अचंभम नाम अष्टौ ॥
१६ ५०४ उपशम नाम पंच ॥

२९१.१) उर्ज्जोत्साहो

२९२.१) भाति for भीति

तृष्णाक्षयः शमः शान्तिरुपशमश्च पञ्चमम् ।
शमथः;[1] कारणं स्थायिनो रसानां क्रमादमी ॥ २९६ ॥
[2] जाड्यं स्तम्भो[3]ऽथ निदाघो घर्मः स्वेदो[4]ऽथ कण्टकः ।
पुलको द्वावस्त्रियौस्तो रोमाञ्चो रोमहर्षणम् ॥ २९७ ॥
रोमोद्गमो रोमविकार उल्लूकसनं पुनः ।
उद्धुषणं;[5] कलत्वं चेत् स्वरे स्वरभेदो हि यः॥ २९८ ॥
[6]वैवर्ण्यं कालिका वर्णविपर्यासो[7]ऽथ वेपथुः ।
कम्पनं;[8] प्रलयोऽचेष्टा;[9] बाष्पोऽस्त्रमस्तु रोदनम् ॥ २९९ ॥
अश्रुनेत्राम्बु; भावाः[10a] स्युः संचारिस्थायिसात्त्विकाः ।
[11]स्युस्त्रयः संचारीस्थायिभावा[12]अथ रसाः पुनः ॥ ३०० ॥
[13] अस्त्री शृङ्गारः करुणो हास्यो वीरो भयानकः ।
रौद्रः शान्तोऽद्भुतो भूयो बीभत्सोऽथाधिकरणः ॥ ३०१ ॥
पात्राणि नाटके;[14] रामादीनां रूपपरिग्रहः ।
भूमिका[15]ऽथ नटोऽस्त्री स्यात् भरतो भरतपुत्रकः ॥ ३०२ ॥

---

१ ५०५ इतरागादिक शमपर्यंत शृंगारादिक नवरसना कारण ॥
२ ५०६ हिवइ अष्टविध सात्त्विक भाव कहइछइ ॥
३ ५०६ डा [स्व ?] चित्त नाम द्वयं ॥
४ ५०७ परसेवा नाम त्रयं ॥
५ ५०८ रोमाञ्चनामऽष्टौ ॥
६ ५०९ कलरावणा गलगला स्वर नाम एक ॥
७ ५१० शरीररंग पालटा नाम द्वयं ॥
८ ५११ धूजणा नाम द्वयं ॥
९ ५१२ नष्टचेष्टा नाम द्वयं ॥
१० ५१३ आसूं नाम षट् ॥
११ ५१३ a सात्त्विकाष्टांतीनेभोवारो ॥
१२ ५१४ ३ रो एकोक्त्या नाम एकं ॥
१३ ५१५ नवन(र)सरो एकोक्त्या नाम एकं ॥
१४ ५१६ नवरसरा नाम ॥
१५ ५१७ नाटके पात्रादिकनइ वेषांतरनउ परिग्रह तन्नाम एकं ॥
१६ ५१८ नट्टआ नाम एकादश ॥

२९६.१) पंचमाः
२९८.२) तेत् for चेत्
२९९.२) अस्तु for अस्रु
३००.२) letters स्थायि...भावा are almost flown off
३०१.२) स्त्री

धर्मापुत्रः सर्वकेशी[17a] कुशाश्वी नन्त इष्यते ।
शैलूषः शैलाली जायाऽऽजीवो रङ्गावतारकः ॥ ३०३ ॥
रङ्गाजीवः;[1] चारणस्तु कुशीलवो द्वितीयकम् ।
[2]स्त्रीवेषभृन्नटः कुंसो भ्रू-भ्रु-भ्र-भृ-परो यदा ॥ ३०४ ॥
[3]नाट्यविधेः सूत्रधारः सूचकोऽप्यत्र दर्शकः ।
[4]वेश्याचार्यः पीठमर्दः;[5] नन्दी स नान्द्याः पाठकः ॥ ३०५ ॥
[6]पारिपार्श्विकः पार्श्वस्थो;[7] वैहासिको विदूषकः ।
प्रहासी स्यात्केलिकिलो भूयो वासन्तिकस्तथा ॥ ३०६ ॥
प्रीतिदोऽथ पल्लवको विट् षिङ्गः;[8] पिता आबुकः ।
[10]नाट्ये स्वसृपतौ च आवुत्तः स्याद्भावुक इत्यपि ॥ ३०७ ॥
[11]सुधीर्भावो;[12]युवराजो यः कुमारः स तूद्वितः ।
भर्तृदारकः;[13] या बाला [वा]सूः स्त्री[14]मार्ष इत्यसौ ॥ ३०८ ॥
आर्यः;[15] स्वामी भवेद्भट्टारको देवो[16]ऽपि राज्ञियः ।
भूपस्यालो;[17] या च पुत्री भूपतेर्भर्तृदारिका ॥ ३०९ ॥

१ ५१९ बाजीगर नाम द्वयं ॥
२ ५२० भंवाईया नाम चत्वारि ॥
३ ५२१ नाटके उपदेशक नाम द्वयं ॥
४ ५२२ वेश्या नाटक सीषवणहार नाम द्वयं ॥
५ ५२३ नाटके नांदीविधिपाठक नाम एकं ॥
६ ५२४ नाटके पासेवाण द्वयं ॥
७ ५२५ नाटके रामतीयाल नाम षट् ॥
८ ५२६ नाटके छींगा नाम त्रयं ॥
९ ५२७ नाटके पिता नाम एकं ॥
१० ५२८ नाटके बहिनीपति नाम द्वयं ॥
११ ५२९ नाटके पंडित नाम एकं ॥
१२ ५३० नाटके युवराजकुमार नाम त्रयं ॥
१३ ५३१ नाटके बालिका नाम एकं ॥
१४ ५३२ नाटके आचार्य नाम एकं ॥
१५ ५३३ नाटके धणी नाम द्वयं ॥
१६ ५३४ नाटके राजा तेहना साला नाम एकं ॥
१७ ५३५ नाटके राजा तस्य पुत्री नाम एकं ॥

३०४·२) कुंशा
३०५·१) नाट्यविविधेः
३०६·१) विदूषिकः ·२) कलिकिलो

[1]कृतपट्टाभिषेका या देवी;[2] अन्या तु भट्टिनी ।
[3]वेश्याऽज्जुका;[4] सखीहूतौ हला;[5] दासीहवे पुनः ॥ ३१० ॥
हञ्जे;[6] हण्डे नीचहूतौ[7] [17b] यद्वा स्यादत्तिका स्वसा ।
[8]आर्यपुत्रः पति[9]रम्बा माता;[10]ऽब्रह्मण्यमुच्यते ॥ ३११ ॥
वधानर्हस्य विप्रस्य थूत्करणे;[11]ऽथ ये क्षितौ ।
निर्ग्रन्थाः सौगताद्यास्ते भदन्ताः कथिताः समे ॥ ३१२ ॥
[12]गीतं नृत्तं तथा वाद्यमेतत्समुदितत्रयम् ।
तौर्यत्रिकं नाट्य[13]मस्मिन् संगीतमुच्यते ॥ ३१३ ॥
प्रेक्षणार्थं समारब्धे[14] नाट्यधर्मी क्रियां तथा ।
शास्त्रोदिते;[15]ऽथ गान्धर्वगीतिर्गीतं च मुख्यतः ॥ ३१४ ॥
गानं गेय[16]मथो नृत्तं नृत्यं नटननर्तने ।
लास्यं नाट्यं ताण्डवोऽस्त्रीः[17] वशानां मण्डलेन यत् ॥ ३१५ ॥:

---

१ ५३६ नाटके कृताभिषेका राज्ञी तस्या नामैकं ॥
२ ५३७ नाटकेऽकृताभिषेका राज्ञी नाम एकं ॥
३ ५३८ नाटके वेश्या नाम एकं ॥
४ ५३९ नाटके सषीसंबोधन नाम एकं ॥
५ ५४० नाटके दासीसंबोधन नाम एकं ॥
६ ५४१ नाटके नीचसंबोधन नाम एकं ।
७ ५४२ नाटके वडी वहिन नाम एकं ॥ [17 a]
८ ५४३ नाटके भर्त्ता नाम एकं ॥
९ ५४४ नाटके माता नाम एकं ॥
१० ५४५ अवध्यवचन नाम एकं ॥
११ ५४६ नाटके सौगतादिक निर्ग्रंथादिक एकोक्त्या नाम एकं ॥:
१२ ५४७ गीत वाद्य इया तीनारउ एकोक्त्या नाम द्वयं ॥
१३ ५४८ देषिवानइ आरब्ध तौर्यत्रिकरउ नाम एकं ॥
१४ ५४९ भरतशास्त्रोक्त गीतनृत्तवाद्यत्रय नाम एकं ॥
१५ ५५० अनुक्रमत्रय नाम कहइछइ ॥ गीत नाम पंच ॥
१६ ५५१ नाटक नाम सप्तम ॥
१७ ५५२ स्त्रीरउ घुमरी फेरीरूप नाटक नाम एकं ॥

३१०·२) सषीहूतो
३१२·१) रिप्रस्य ·२) निग्रंथाः
३१४·२) नीति for गीति
३१५·१) नृसं for नृत्यं

नृत्तं हल्लीसकं;[1] तूच्चतालं[2] वीरजयन्तिका ।
पानगोष्ठ्यां रणे चेदं क्रमा[3]न्नाट्यस्य यद्भवेत् ॥ ३१६ ॥
स्थानं रङ्गः;[4] पूर्वरङ्गः प्रारम्भो[5]ऽभिनयः पुनः ।
व्यञ्जकः स तु हस्तादिभिः पदार्थस्य सूचकः ॥ ३१७ ॥
[6]सोऽलंकारादिनाऽऽहार्यो;[7] रचितो वचसा पुनः ।
वाचिकः[8] आङ्गिकोऽङ्गेन[9] जातः; सत्त्वेन सात्त्विकः ॥ ३१८ ॥
[10]अङ्गहाराङ्गविक्षेपौ समौ;[11] षट् संस्कृतादिमाः ।
भाषाः स्यु[12]र्भारतीमुख्याश्चतस्रः सन्ति वृत्तयः ॥ ३१९ ॥
[18a][12]......आतो [द्य] तूर्यमस्त्री स्मरध्वजः वाद्यम् ।
[13]ततं वी[णा प्रभृतिकं][14] घनं तालादिकं तथा ॥ ३२० ॥

---

१ ५५३ मद्यपानरी गोठिरइ विषइ जे नाटक तन्नाम एकं ॥
२ ५५४ संग्रामनइ विषय नाटक नाम एकं ॥
३ ५५५ नाटकस्थान नाम एकं ॥
४ ५५६ गीतनृत्यवादित्रय प्रथम प्रारंभ नाम एकं ॥
५ ५५७ देशी दिषाइवा नाम द्वयं ॥
६ ५५८ ते व्यंजक भूषणादिक रचित तन्नाम एकं ॥
७ ५५९ वचनेकरी रचित तन्नाम एकं ॥
८ ५६० अंगइकरी रचित नाम एकं ॥
९ ५६१ मनइकरी रचित तन्नाम एकं ॥
१० ५६२ डील चलावणरा नाम द्वयं ॥
११ ५६३ संस्कृतं प्राकृतं मागधी शौरसेनी पैशाची अपभ्रंश इया छठारउ एकोक्त्या नाम एकं ॥
१२ ५६४ भारतीआदिक आरभटीपर्यंत भाषारउ एकोक्त्या नाम एकं ॥
१३ ५६५ सामान्यतः वाजा नाम + + ॥
१४ ५६६ तांतिरा वाजा नाम एकं ॥
५६७ क + + रा वाजा नाम एकं ॥

३२०.१) letters before आतो are flown off. The line distorts the metre. Hema. reads वाद्यं वादित्रमातोद्यं तूर्यं तूरं स्मरध्वजः । 286

.२) letters in square brackets are almost erased.

[1]शुषिरं वंशप्रमुखं[2]मानद्धं मुरजादिकम् ।
[3]विपञ्ची वल्लकी वीणा चतुर्थी कण्ठकूणिका ॥ ३२१ ॥
घोषवती;[4] सप्तभिः सा तन्त्रीभिः परिवादिनी ।
तन्त्रीभेदादनेके स्युर्भेदा एवं यथाक्रमम् ॥ ३२२ ॥
[5]भारत्याः कच्छपी वीणा;[6] चानालम्बी हरस्य तु ।
[7]महती नारदस्य[१थ][8] बृहती विश्वावसोः पुनः ॥ ३२३ ॥
[9]प्रभावती गणानां हि,[10] तुम्बरोः स्यात्कलावती ।
[11]चाण्डालिका तु कटोलवीणा चण्डालदेहिनाम् ॥ ३२४ ॥
[12]कोलम्बकोऽङ्गं स्यादस्या;[13] उपनाहस्तु बन्धनम् ।
[14]प्रवालोऽस्त्री तथा दण्डः;[15] कलिका कूणिका तु सा ॥ ३२५॥
वंशशलाकाया मूले[16] प्रसेवककुभौ समौ ।
[17]कालमानं यत्क्रियायास्तालः चच्चपुटादिकः ॥ ३२६ ॥

---

१ ५६८ वेझसहित वाजा नाम एकं ॥
२ ५६९ वाजा नाम एकं ॥
३ ५७० सामान्यतः वीणा नाम पंच ॥
४ ५७१ साततंती जिण वीणारइ हुइ तन्नाम एकं ॥
५ ५७२ सरस्वतीनी वीणा नाम एकं ॥
६ ५७३ महादेवनी वीणा नाम एकं ॥
७ ५७४ नारदऋषि वीणानाम एकं ॥
८ ५७५ विश्वावसु देवविशेषवीणा नाम एकं ॥
९ ५७६ ईश्वरगण तेहनी वीणा नाम एकं ॥
१० ५७७ तुंबुरु देवविशेषवीणा नाम एकं ॥
११ ५७८ रबाब नाम द्वयं ॥
१२ ५७९ वीणादेह नाम एकं ॥
१३ ५८० वीणाखूंटा नाम एकं ॥
१४ ५८१ वीणादंड नाम एकं ॥
१५ ५८२ वीणा वजावणवंशषीला नाम द्वयं ॥
१६ ५८३ वीणा नाम द्वयं ॥
१७ ५८४ घनवाद्यभेद कहइछइ ॥ क्रिया आवाप निःष्क्रमणादिक तिणकरी कालतिमेषादिक तेहनउ प्रमाण कीजइ तिणरउ नाम एकं ॥

३२१-२) चतुर्थ Stz. 321 and 322 both bear No. 323 and 323–346 are seen as 324–347 respectively.

[1]तयोः साम्यं लयः प्रोक्तः;[2] ओघो द्रुतलयो मतः ।
[3]तत्त्वं विलम्बितं[18b][4] मध्यलयं नाम घनं स्मृतम् ॥ ३२७ ॥
[5]मुरजो मृदङ्ग[6]स्त्रिधाऽऽलिङ्गी सोऽङ्की तथोर्ध्वकः ।
[7]ढक्का यशः पटहोऽपि[8] भेरी पटह आनकः ॥ ३२८ ॥
पुल्लिङ्गो दुन्दुभिः[9] शारिः वीणादीनां प्रवादनम् ।
कोणो[10]ऽथ गर्द्धोऽभिलाषः स्यात्काङ्क्षा तृड् मनोरथः ॥ ३२९ ॥
तृष्णा लिप्सा लोभो वाञ्छा कामोऽस्त्री कामना रुचिः ।
आशंसा स्पृहाऽऽशीच्छेहा धनायेप्सा वशोपि च ॥ ३३० ॥
[11]अभिध्या सा तु या द्रव्ये परकीये स्पृहा भवेत् ।
[12]द्यूतक्रीडा मांसादनं मद्यपानं पणाङ्गना ॥ ३३१ ॥
पञ्चमं खेटकं कर्म चौरी परवशारुचिः ।
सप्तैतानि व्यसनानि[13] शौर्यशौण्डीर्यविक्रमाः ॥ ३३२ ॥
पराक्रमः पौरुषं च[14] न्यायः कल्पः समञ्जसम् ।
देशरूपं नयोऽभ्रेषो[15]ऽथ युक्तं साम्प्रतं पुनः ॥ ३३३ ॥

---

१ ५८५ तिण कालक्रियासु सदृशपणउ तिणरउ नाम एकं ॥
२ ५८६ तिण लयरा त्रेणि भेद द्रुतं विलंबितं मध्यं द्रुतलये नाम एकं ॥
३ ५८७ विलंबित लय नाम एकं ॥
४ ५८८ मध्यलय नाम एकं ॥ [18 b]
५ ५८९ आनद्धवाद्य कहइछइ । सामान्यतः मादल नाम द्वयं ॥
६ ५९० मा [द] लारा तीन भेद कहइछइ ॥
७ ५९१ ढोलक नाम एक ॥
८ ५९२ दमामा नाम चत्वारि ॥
९ ५९३ ढोलादिकरा डंडीया वीणारी शलाका तेहना नाम द्वयं ॥
१० ५९४ लोभरा नाम विंशतिः ॥
११ ५९५ पारका द्रव्य वांछा नाम एक ॥
१२ ५९६ सात व्यसन नाम एकोक्त्या एक ॥
१३ ५९७ पुरुषकार नाम पंच ॥
१४ ५९८ न्याय नाम षट् ॥
१५ ५९९ जुगती वात नाम नव ॥

३२७·२) तत्त्वं for सत्त्वं
३२८·१) स्त्रेधालिंगा, ·२) ढक्का
३२९·१) वीणादिम
३३२·१) पंचकं ·२) शौडीर्य

न्याय्यं लभ्यं भजमानं प्राप्तमौपायिकं तथा ।
उचितमभिनीतं च वाच्यलिङ्गा अमी समे ॥ ३३४ ॥

[1]अधिकारः प्रक्रिया सा व्यवस्था स्थापनं हि यत् ।
[2]मर्यादास्थितिसंस्थाश्च धारणा;[3] आगो नपुंसके ॥ ३३५ ॥

मन्तुः पुमान् व्यलीकं स्यादस्त्रियां विप्रियं पुनः ।
अपराधो[4]ऽथ विजनं निःशलाकं च केवलम् ॥ ३३६ ॥

छन्नं विविक्तमेकान्तं रहः क्लीबेऽस्त्रियां पुनः ।
उपह्वरं [उपांशु च] तदव्ययं विबुधैर्मतम् ॥ ३३७ ॥

[19 a][5] रहस्यं गुह्यं तज्ज्ञेयं गोपनीयं हि यद्भवेत् ।
[6]तरोऽसन्तः क्लीबे स्थामा नन्तः क्लीवे पराक्रमः ॥ ३३८ ॥

प्राणः शक्तिः सहः सन्तस्तथौजोऽपि नपुंसके ।
बलमस्त्री शूष्म नान्त ऊर्जोऽक्लीबस्तथा त्रयः ॥ ३३९ ॥

शुष्मं शौर्यं द्युम्नमथ[7] बलात्कारो हठः पुनः ।
प्रसभोऽस्त्रियां[8] स्खलितं छलं;[9] दानविसर्जने ॥ ३४० ॥

विश्राणनमुत्सर्जनं त्यागः स्यात्प्रतिपादनम् ।
अपवर्जनं स्पर्शनं प्रदेशनविहायिते ॥ ३४१ ॥

वितरणं निर्वपनं स्त्रियामंहतिरित्यपि ।
[10]अर्थना प्रणयोऽध्येषणा सनिः स्त्रीपुमानपि ॥ ३४२ ॥

---

१ ६०० अधिकार नाम द्वयं ॥
२ ६०१ मर्यादा नाम चत्वारि ॥
३ ६०२ अपराध नाम पंच ॥
४ ६०३ एकांत नाम नव ॥
५ ६०४ छीनाराषण गोपवा नाम [19 a] द्वयं ॥
६ ६०५ बलरा नाम त्रयोदश ॥
७ ६०६ हठ नाम त्रयं ॥
८ ६०७ छल नाम द्वयं ॥
९ ६०८ दीननाम त्रयोदश ॥
१० ६०९ मांगिवा नाम एकादश ॥

३३४·२) अमे समी.   ३३९·१) तयोजो

अर्दना याचना याच्ञेषणाऽभिशास्तिमार्गणे।
भिक्षणा[1]ऽथ क्षमा आवत (?) स्तितिक्षा सहनं;[2] रुचिः ॥३४३॥
स्त्रियां जिघत्साऽशनाया बुभुक्षा रोचकोऽस्त्रियाम्।
[3]अपलासिका पिपासा तृष्णोदन्या तृषा च तृट् ॥ ३४४ ॥
तर्षः पानं धीति[4] रथो सौहित्यं स्यादाघ्राणकम्।
तृप्ति[5] रथ परिभावो विप्रकारः पराभवः ॥ ३४५ ॥
अत्यकारः परिभवोऽभिभवश्च तिरस्क्रिया।
न्यक्कारनिकारौ;[6] कपटोऽस्त्री व्याजो मिषं छलम् ॥ ३४६ ॥
कूटमस्त्री व्यपदेशः छद्मोपधि स्यात्कैतवम्।
लक्ष्मस्त्री निभं दम्भो[7]ऽथ कुहना च कुक्कुटिः ॥ ३४७ ॥
दम्भचर्या च;[8] व्यलीकमतिसंधानवञ्चने।
प्रतारण[9]मथो पूज्यनाम्नो भट्टारकादयः ॥ ३४८ ॥
त्रयः प्रयोज्यास्तेन स्यादर्हद्भट्टारकस्तथा।
पूज्यपादो नरदेव एवमन्येप्यनेकशः ॥ ३४९ ॥
[19b][10]तत्रभवान् भगवानत्र भवान् पूज्य इत्य[11]थ।
कुसृतिर्निकृतिर्माया शठता शाठ्यमप्य[12]थ ॥ ३५० ॥
अहिंसा निर्मला क्षान्तिरनुकम्पा घृणा दया।
शूकोऽस्त्री स्यादनुक्रोशः कारुण्यं करुणा कृपा ॥ ३५१ ॥

सिद्धशब्दार्णवैः साङ्गः श्रीसहजादिकीर्तिभिः।
पूज्यः प्रथमकाण्डोऽयं स्मृतिमार्गमनीयत ॥ १ ॥

---

१ ६१० क्षमा नाम त्रयं ॥
२ ६११ भूष नाम पंच ॥
३ ६१२ तृषा नाम नव ॥
४ ६१३ तृप्ति नाम त्रयं ॥
५ ६१४ पराभव नाम नव ॥
६ ६१५ कपट नाम द्वादश ॥
७ ६१६ दंभचर्या नाम त्रयं ॥
८ ६१७ वंचन नाम चत्वारि ॥
९ ६१८ पूज्यनाम त्रयं ॥
१० ६१९ विशेष पू [19 b] ज्य नाम चत्वारि ॥
११ ६२० माया नाम पंच ॥
१२ ६२१ दयानाम एकादश ॥

३४३.१) भिघस्ति ३४६.२) निकारनिकारौ
३४५.१) धाति for धीति ३५०.२) निकृति

KĀṆḌA II

ऐ नमः ॥

[1]नाकोऽस्त्री त्रिदिवं तथैव तविषो द्यौः स्त्री दिवं ताविषः ।
स्वर्गो गौरनपुंसको भुविरिति स्त्री चोर्ध्वलोकोऽव्ययम् ॥
स्वर्देवालयसैरिकौ दिदिविकः स्याद्दीदिविर्वासवावासः ।
क्लीव इति त्रिविष्टपमपि द्युर्मेरुपृष्ठं तथा ॥ १ ॥
फलोदयो[2]ऽथ निर्जरा सुपर्वदेवनाकिनः ।
अमर्त्यलेखतत्सदः सुधाभुजो निलिम्पकाः ॥ २ ॥
गीर्वाणा अमृतान्धसः सुमनसः स्वाहाभुजो देवता ।
अस्वप्ना विबुधाः सुधाक्रतुभुजो बर्हिर्मुखाः पूजिलाः
आदित्या दनुजद्विषश्चानिमिषाः कामादिरूपाश्चिरा-
युर्मर्त्यार्चितसाध्यशोभमरुतो वृन्दारका दैवता ॥ ३ ॥
अस्त्र्येष (?) एवं त्रिदशा अमरा ऋभवः सुराः ।
[3]अथार्काः द्वादश; तुषिताः षट्त्रिंशत्; वसवः पुनः ॥ ४ ॥
अष्टौः त्रयोदश विश्वे देवा; आभासुरास्तथा ।
षष्टिर्द्वादश साध्याश्च सुशर्म्माणो दश स्मृताः ॥ ५ ॥
रुद्रा एकादश प्रोक्ताः वैकुण्ठाः स्युश्चतुर्दश ।
एकोनपञ्चाशच्च स्युर्वायवो महाराजिकाः ॥ ६ ॥
षट्त्रिंशदेते सर्वेऽपि विज्ञेया गणदेवताः ।
[4]विमानमस्त्री तेषां स्याद्वाहनं;[5] भोजनं तथा ॥ ७ ॥

---

१ १ स्वर्गलोक नाम विंशतिः ॥
२ २ देवता नाम पंचत्रिंशत् ॥
३ ३ देवताना शैवशासनप्रसिद्ध विशेष भेद नाम ॥
४ ४ विमान नाम एक ॥
५ ५ अमृत नाम त्रयं ॥

१·२) अन्वर्थयं ·३) सैरिको
·४) °पृष्ठ
२·२) तिलिंपका
३·२) ऽस्वप्रा, क्रंतु° ·३) द्विषस्व
·४) मर्त्यार्चित, शोभन, वृंता-
रका देवता
४·१) क्षभवः सुरः ·२) उषिता
५·१) विश्वदेवा ·२) स्वाध्या,
सुसर्माणो.

[20 a] सुधा पीयूषममृत[1]मसुराः दानवाः पुनः ।
इन्द्रारयः शुक्रशिष्याः पूर्वदेवाः सुरद्विषः ॥ ८ ॥
दनुजा दैत्यदैतेया दितिसुता[2] अमी दश ।
असुरप्रमुखाश्च दिक्कुमारान्ता जिनागमे ॥ ९ ॥
पातालवासिनः सर्वे अमरेन्द्राद्या नामतः ।
[3]व्यन्तराश्च पिशाचाद्याष्टौ पातालवासिनः ॥ १० ॥
[4]चन्द्राद्याः पञ्चसंख्याका ज्योतिष्काश्च[5] खचारिणः ॥
सौधर्माश्चाच्युतान्ता द्वादश स्युर्विमानगाः ॥ ११ ॥
[6]कल्पातीता नव पञ्च भेदा एवं सुराः समे ॥
निकायभेदतो जाताश्चत्वारोऽ[7]थ विशेषतः ॥ १२ ॥
पुरन्दरोऽच्युताग्रजः सहस्रनेत्रवासवौ ।
शचीपतिः शतक्रतुः सुरर्षभश्च कौशिकः ॥ १३ ॥
ऋभुक्षिमेघवाहनौ हरिश्च पाकशासनः ।
वरक्रतुर्वृषा जयः सुरेशपूर्वदिक्पती ॥ १४ ॥
[8]पर्जन्यो वाहुदन्तेयः पुरुहूतोऽप्सरःपतिः ।
तपस्तक्षः स्वर्गपतिर्हरिमान् वज्रदक्षिणः ॥ १५ ॥

---

१ ६ दाणव नाम दश ॥
२ ७ दानवभेद कहइछइ ॥
३ ८ विंतरका भेद कहइछइ ॥
४ ९ ज्योतिषी ग्रह नाम एक ॥
५ १० विमानवासी देवता नाम एक ॥
६ ११ ग्रैवेयकऽनुत्तर देवता नाम एक ॥
७ १२ इंद्रनाम पट्पंचाशत् ॥
८ १३ उभे प्रमाणिके छंदसा ॥

१०·१) चमरेंद्रा° ·२) अष्टौ for details *of* Hema. 91

११·२) विमानजाः, द्वादश details *of* Hema. 93

१२) *cf*. Hema. 94 कल्पातीता नव ग्रैवेयकाः पञ्चत्वनुत्तराः निकायभेदादेवं स्युः देवाः किल चतुर्विधाः ॥

१४·२) भभुक्षि

१५·१) अप्सरपति ·२) स्वर्ग्र°

चास्तोष्पतिः सुनासीरः सुत्रामशक्रदल्मयः ।
विडौजा मघवा वज्री मघवान् देवदुन्दुभिः ॥ १६ ॥
वृत्रहा गोत्रभृत् प्रक्रन्दन आखण्डलः पुनः ।
हरिहयो जम्भभेदी जिष्णुर्नमुचिसूदनः ॥ १७ ॥
बलद्विद् प्राचीनबर्हिस्तुराषाट् विपुनोऽपि च ।
वृद्धश्रवाः पृतनाषाट् मरुत्वान्मिहिरः पुनः ॥ १८ ॥
उग्रधन्वा दुश्च्यवनः यामनेमिरसमहा ।
किणालातः;[1] प्रिया चास्य शची चारुरवा तथा ॥ १९ ॥
शतावरी पौलोमी च शक्राणी जयवाहिनी ।
इन्द्राणी स्यात्परिपूर्णसहस्र[20 b] चन्द्रवत्यपि ॥ २० ॥
[2] पुत्रो जयो जयदत्तो जयन्तः पाकशासनिः ।
[3] जयन्ती तनया ताविषी तविषी[4] हयः पुनः ॥ २१ ॥
उच्चैःश्रवा वृषणाश्वो;[5] मातलिस्तु हयंकषः ।
सारथि[6] र्नन्दनं नाम वनं सर्वसुरप्रियम् ॥ २२ ॥
[7] प्रासादो वैजयन्तोऽपि ध्वजो;[8] दौवारिको महान् ।
देवनन्दी भवेन्नान्तः[9] सरो नन्दीसरो वरम् ॥ २३ ॥
[10] हस्ती चैरावणो हस्तिमल्ल ऐरावतोऽस्त्रियाम् ।
अभ्रमातङ्गश्चाभ्रमुवल्लभश्च मदांवरः ॥ २४ ॥

---

१ १४ इंद्राणी नामऽष्टौ ॥
२ १५ इंद्रपुत्र नाम चत्वारि ॥
३ १६ इंद्रपुत्री नाम त्रयं ॥
४ १७ इंद्रना घोडाना नाम द्वयं ॥
५ १८ इंद्रसारथी नाम द्वयं ॥
६ १९ इंद्रवन नाम एकं ॥
७ २० इंद्रप्रसादनइ ध्वजानो नाम एक ॥
८ २१ इंद्रिपोलिया नाम एक ॥
९ २२ इंद्रसरोवर नाम एक ॥
१० २३ ऐरावण इंद्रहाथी नाम एकादश ॥

१६·१) वासोपतिः
१८·१) विपुतो and विपुला confused
१९·१) Hem. reads नेमि रसन्महाः
२०·१) पौलोथी
२१·२) तांविषी
२२·१) पातलि for मातलि
२३·२) नदीसरो १ वरं २
२४·१) वैरावणो, ·२) श्चात्रमुवऽभव श्रमदांवर

श्वेतगजो भद्रवेणुः सदादानोऽर्कसोदरः ॥
चतुर्दन्तो;[1] धनुर्देवायुधं तत्सरलं तथा ॥ २५ ॥
रोहितं[2] यदि दीर्घं तु सरलं तन्निगद्यते ।
ऐरावतमस्त्रियां च;[3] वज्रमस्त्री पविः पुमान् ॥ २६॥
अशनिरक्लीवः शम्बः शतकोटिः पुमान् स्वरुः ।
तामेव(?) ह्लादिनी दम्भोलिः पुमान् भिदुरं पुनः ॥ २७ ॥
कुलिशोऽस्त्री व्याधामो[4]ऽस्य ज्वालाऽतिभी स्त्रियाम् ।
[5]ध्वनिः स्फूर्जथुः पुमान्;[6] अमरावती सुदर्शनं च पूः ॥ २८ ॥
[7]सभा सुधर्मा स्त्रीनंतं[8] स्तरवो हरिचन्दनः ।
अस्त्री मन्दारसन्तानौ पारिजातश्च पञ्चमः ॥ २९ ॥
कल्पोऽश्विनौ यमौ दस्रौ नासिक्यौ वडवासुतौ ।
अब्धिजावश्विनीपुत्रौ स्ववैद्यावर्कजौ पुनः ॥ ३० ॥
नासत्यौ नासत्यदस्रौ तथाऽग्रवरवाहनौ ।
गदान्तकौ यज्ञवाहौ पुं[21a]सि द्विवचनौ सदा ॥ ३१ ॥

---

१ २४ सरल इंद्रधनुष नाम एक ॥
२ २५ दीर्घसरल इंद्रधनुष नाम एक ॥
३ २६ इंद्रायुध वज्र नाम द्वादश ॥
४ २७ वज्रका [जा] ल नाम एक ॥
५ २८ वज्रध्वनि नाम एक ॥
६ २९ इंद्रनगरी नाम द्वयं ॥
७ ३० इंद्रसभा नाम एकं ॥
८ ३१ इंद्रपंचवृक्ष नाम ॥
९ ३२ स्वर्गावेष (स्वर्गवैद्य) नाम चतुर्दश ॥

२५·१) श्वेतगजो ·२) चतुदंतो
२६·१) तसि गद्यते ·२) पुमान् is taken in the next line just below its proper place confusing the reading.
२७·१) स्वदप्र for स्वरुः ·२) पुनः may be replaced by भिदुः
२८·१) अतिभा, ·२) °स्फूर्जकः
२९·१) हरिचंदऽस्त्री ·२) श्व for श्च
३०·२) ऽब्धिजादवऽश्विनी° °द्यावऽ-क्काजौ
३१·२) यजावाहो

[1]विश्वकृद्विश्वकर्मा च त्वष्टा स्याद्देववर्द्धकिः ।
[2]हाहाः पुंसि[च] तन्मुख्या हाहाहूहूः परे पुनः ॥ ३२ ॥
गान्धर्वास्तथा गन्धर्वाः तृतीयं देवगायनाः ।
[3]स्वर्वेश्वः स्वर्गवध्वश्चाप्सरसस्त्री वहुष्वयम् ॥ ३३ ॥
स्वर्वेश्या ऊर्वशीमुख्या[4] अथ प्रेतपतिर्यमः ।
यमुनाभ्राता कीनाशो दक्षिणाशापतिर्हरिः ॥ ३४ ॥
कृतान्तः कालशीर्णाङ्घ्री धर्मराजोऽर्कनन्दनः ।
समवर्ती श्राद्धदेवो मृत्युः स्याच्छमनोऽन्तकः ॥ ३५ ॥
दण्डधरः पितृपतिर्यमराट् माहिषध्वजः ।
महासत्यः कालकूटो यमुनाग्रज इत्यपि ॥ ३६ ॥
पुराणान्तोऽस्य धूमोर्णा प्रेयसी;[6] [लेखकस्तथा ।
चित्रगुप्तः]; प्रतिहारो वैध्यतः;[7] सेवकावुभौ ॥ ३७ ॥
चण्डस्तथा महाचण्डः;[8] पुरी संयमनी भया ।
[9]रक्षोऽसंतश्च कीनाशः पलादो निकषात्मजः ॥ ३८ ॥
यात्वस्त्री कौणपः पुण्यजनोऽसृक्पश्च नैर्ऋतः ।
नृचक्षाः कर्बुरो रात्रिंचरो रात्रिचरः पुनः ॥ ३९ ॥
पलप्रियो यातुधान आशरो राक्षसः पुमान् ॥
क्रव्याद्कर्वरो विधुरः आशिरो जललोहितः ॥ ४० ॥

---

१ ३३ देवसूत्रधार नाम चत्वारि ॥
२ ३४ देवगायन नाम त्रयं ॥
३ ३५ स्वर्गवेश्या नाम पंच ॥
४ ३६ यमनाम चतुर्विंशतिः ॥
५ ३७ यमस्त्री नाम एक ॥
६ ३८ यमलेखक नाम एक ॥
७ ३९ यमकिंकर नाम ॥
८ ४० यमनगरी नाम द्वयं ॥
९ ४१ राक्षस नाम चतुस्त्रिंशत् ॥

३२·१) चतुष्टा स्यादेकिः, °ववर्द्धि° added in a different hand above the line.
३३·२) स्वर्गेवधः
३५·१) शार्णान्ध्री ·२) शमवर्शी, स्यात्वमीनो°
३६·१) °ध्वनः
३८·२) संनश्च कानाशः, निकसात्मजः
३९·२) रात्रिवरो
४०·१) यातुधाना

संध्याचलः कखापुत्रः उद्धरो नरविष्वणः ।
त्रिशरो हरषः शङ्करः रात्रिवलः प्रचाहिकः ॥ ४१ ॥
रक्तग्रीवस्तब्धसंभारः पुनः समितीपदः ।
[1]प्रचेता वरुणो याङ्‌पतिर्जलपतिस्तथा ॥ ४२ ॥
पाशपाणिर्मेघनादोऽर्णवमन्दिरसंवृतौ ।
परंजनो जलकान्तारः प्रतीचीशदुन्दुभी ॥ ४३ ॥
उद्दामोऽथ कैलासौका धनदो नरवाहनः ।
ऐलविलो वैश्रवणस्त्रिशराः किंनरेश्वरः ॥ ४४ ॥
[21 b]धनेश्वरो निधीश्वरः पिशाचकी सितोदरः ।
नृधर्मगुह्यकेश्वरौ कुवेरसत्यसंगरौ ॥ ४५ ॥
एकपिङ्गो रत्नकरः श्रीदो यक्षेश्वरः एतः (?)
इच्छावसुरीशसखो निधनाक्षः पुनः कुहः ॥ ४६ ॥
पौलस्त्यश्च सुप्रसन्नः उत्तराशापतिस्तथा ।
रत्नगर्भो महासत्त्वो धनकेलिः प्रमोदितः ॥ ४७ ॥
[3]अस्य चैत्ररथं नाम वनं;[4] पूरलका प्रभा ।
वसुप्रभा वसुसारा स्याद्वस्वोकसारा; [5]सुतः ॥ ४८ ॥
नलकूबरो; [6]विमानं पुष्पकं; [7]राजगुह्यकौ ।
वटवासी पुण्यजनो यक्षः [8]किंपुरुषो मयुः ॥ ४९ ॥
किन्नरस्तुरङ्गमुखो; [9]दिशामीशा अथ क्रमात् ।
इन्द्रो हुताशनो मृत्युर्नैर्ऋतो वरुणो मरुत् ॥ ५० ॥

१ ४२ वरुणदेवता नाम त्रयोदश ॥
२ ४३ धनद भंडारी नाम त्रिंशत् ॥
३ ४४ धनदवन नाम एकं ॥
४ ४५ धनदसा(पु)री नाम पंच ॥
५ ४६ धनदपुत्र नाम एकं ॥
६ ४७ धन[द]विमान नाम एकं ॥
७ ४८ यक्षदेवता नाम पंच ॥
८ ४९ किंनरदेवता नाम चत्वारि ॥
९ ५० अष्टदिशिपाल नाम ॥

४१.१) रुद्रो .२) त्रिशरा may be त्रिशिरस्
४२.२) वादपति
४४.१) केलाशोका; .२) त्रिशिरस् ?
४५.१) निधाश्वर पिशाचाका
४६.१) एकपिगौ, पक्षेश्वरः
४८.२) स्याद्वासोंकसारा

धनद ईशानो ऽ [थ] [1]दिग्गजा अष्ट ते अमी ।
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥ ५१ ॥
पुष्पदन्तः सार्व्वभौमः सुप्रतीकः; [2]करेणवः ।
अभ्रमुः कपिलाऽनुपमा क्रमादथ ॥ ५२ ॥
ताम्रकर्णी शुभ्रदन्ती चाङ्गना अञ्जनावती ।
[3]अथ चन्द्रो निशारत्नो निशाकरस्तिथिप्रणीः ॥ ५३ ॥
दशवाजी दशाश्वोऽपि सितवाजी सिताश्वकः ।
सोमोऽमृतद्युतिः श्वेतद्युतिग्लौं रोहिणीपतिः ॥ ५४ ॥
जैवातृकोऽमृतसूश्चात्रिदृग्जो दक्षजापतिः ।
निशापतिर्द्विजपती राजा कुमुदबान्धवः ॥ ५५ ॥
कलाभृत् शशभृच्छायाभृदेणभृद्धिमद्युतिः ।
कौमुदीपतिर्मार्जणी विधुः कुमुदिनीपतिः ॥ ५६ ॥
चन्द्रमाः ओषधिप [22a] तिर्भपतिः कृत्तिकाभवः ।
राजराजस्तपाराजः शुभांशुशयतौ बुधः ॥ ५७ ॥
यज्ञराट् यजतः सृप्र खशिख श्वेतवाहनः ।
सिन्धूत्थ ओषधीगर्भः अविप्रारमणोऽपि च ॥ ५८ ॥
स्यन्द्र आकाशचमसः पीतुश्चन्दिर एकभूः ।
नेमिः स्याद्युवनः क्लेन्दुरिन्दुरस्य कला पुनः ॥ ५९ ॥
भागः स्यात्षोडशो;[4] लक्ष्म लाञ्छनं चिह्नलक्षणे ।
अभिज्ञानं कलङ्कोऽङ्को[5]ऽथ ज्योत्स्ना चन्द्रगोलिका ॥ ६० ॥

१ ५१ अष्टदिग्गज नाम एकं ॥
२ ५२ दिग्गजभार्या नाम एकं ॥
३ ५३ चंद्रमा नाम अष्टपंचाशत् ॥
४ ५४ चंद्रकलंक नाम सप्त ॥
५ ५५ चंद्रमारा उजवाला नाम पंच ॥

५१·१) °नोप्पऽष्टदि°, चमी for अमी
५३·१) ताम्रकरणी, वांजनावती
५४·१) दसवाजी, शितवाजी
५५·१) श्चाऽनिदृग्जो
५६·२) normally र्जणी
५७·१) अषधपतिर्सपति ·२) शयनो
५८·१) खसिकः
५९·१) °चमप्रः ·२) °रिदु
६०·२) कलकोंऽको

चन्द्रिका कौमुदी चन्द्रातपो[1]ऽथ बिम्बमस्त्रियाम् ।
मण्डलं त्रिष्व[2]थादित्यो यमुनाजनकः शुचिः ॥ ६१ ॥
विवस्वान् मिहिरो मित्रो द्युपतिर्गोपतिः पुनः ॥
सूरो मार्तण्डमार्त्ताण्डौ द्वादशात्मा विरोचनः ॥ ६२ ॥
दिवाकरः प्रभाकरो विभाकरश्च भास्करः ।
अहस्करो विकर्त्तनो अहाब्जिनीपतिः खगः ॥ ६३ ॥
विभावसुस्त्रयीतनुर्गभस्तिचक्रवान्धवौ ।
नभोमणिस्त्वहर्मणिर्हरिः पतङ्गतापनौ ॥ ६४ ॥
ध्वान्तारातो रविः सूर्यः कृतान्तजनको भगः ।
प्रद्योतनश्चित्रभानुस्तरणि [श्चा] नपुंसकः ॥ ६५ ॥
इनो हेलिर्हरिदश्वः किरणोऽरुणसारथिः ।
कर्मसाक्षी जगत्साक्षी भास्वान् ग्रहपुषोऽर्यमा ॥ ६६ ॥
जगच्चक्षुरब्जहस्तोऽर्क्को दिवसकरस्तथा ।
दिनकरो अंशुहस्तश्च तपनो गगनाध्वगः ॥ ६७ ॥
सहस्रांशुः खरांशुश्च हंसस्त्वष्टाऽरुणः पपीः ।
ब्रध्नोऽहर्बान्धवस्सततसातिः स्यादब्जबान्धवः ॥ ६८ ॥
उष्णांशुस्सविता पूषा भानेमिर्गगनध्वजः ।
अंशुर्भानुर्दिवापुष्टौ लोक [22 b] बन्धुः सदागतिः ॥ ६९ ॥
सहस्राङ्कः खतिलको द्दशानः कर्णसूः कपिः ।
वेदोदयो बहुरूपः प्रत्यूषाण्डोऽम्बुतस्करः ॥ ७० ॥
गलो प्रकाशनः पातुर्जगद्दीपः सुरावृतः ।
सांवत्सररथः पाथः पुष्करो भानुकेशरः ॥ ७१ ॥
ब्रह्मा वाजी कालधरो रात्रिनाशन इत्यपि ।
[3]भानुगभस्तिवसवस्त्रयः पुंसि प्रभा स्त्रियाम् ॥ ७२ ॥
रुचिद्युती स्त्रियामुभे विभाऽनपुंसका च भा ।
मरीचिवृश्नयस्त्रयः शुचिः पुमान् करस्तथा ॥ ७३ ॥

---

१ ५६ चंद्रमंडल नाम द्वयं ॥
२ ५७ सूर्यनामऽष्टनवति ॥
३ ५८ सूर्यकिरण नाम एकोनचत्वारिंशत् ॥

६१·१) विलंबमऽस्त्रियां
६२·१) विविश्वान् ·२) द्वादशामा
६५·२) प्रथोतत
६८·८) ग्रघ्नो
७०·२) प्रत्यूषाडो
७३·१) रुचिर्द्युती

रोचिः क्लीबेऽशुरभीशुस्तथोपधृतिप्रग्रहौ ।
घृणिरश्मिकेतवोऽपि विरोकाकिरणौ त्विषि ॥ ७४ ॥
मयूख रुक्पादोस्रा एते पुंसि चतुर्दश ।
गौरक्लीवस्तथा क्लीबे शोचिः ज्योतिश्च दीधितिः ॥ ७५ ॥
स्त्रियामर्चिरपुमांश्च धाम क्लीबे तथा महः ।
भाश्छविस्त्विट्द्युतिर्द्युश्च स्त्रियां पञ्च स्मृता अमी ॥ ७६ ॥
[1]आतपालोकौ तेजो वर्च उद्योतपञ्चसम् ।
प्रकाशः [2]स्यान्मृगतृष्णा मरीचिका [3]ऽथ मण्डलम् ॥ ७७ ॥
त्रिलिङ्गोऽयमुपसूर्यकं क्लीबोऽ[थ] परिधिः पुनः ।
परिवेषः; [4]सूर्यसूतः काश्यपिः गरुडाग्रजः ॥ ७८ ॥
अरुणो विनतासूनुरनूरुर्महासारथिः ।
विपुलस्कन्धो; [5]रेवन्तो हयवाहन इत्यपि ॥ ७९ ॥
प्लवगोऽर्करेतोजश्च; [6]माठराद्या अहर्पतेः ।
अष्टादश सदा पारिपार्श्विका [7]अथ मङ्गलः ॥ ८० ॥
लोहिताङ्गः कुजो वक्र आषाढा [23a] भूरङ्गारकः ।
नवार्चिरार एकाङ्गो व्योमोल्मुकस्त्व[8]थो बुधः ॥ ८१ ॥
श्रविष्ठाभूः श्यामाङ्गो ज्ञः पञ्चार्चो रोहिणीसुतः ।
सौम्यः प्रहर्षलो; [9]जीवः सुराचार्यो बृहस्पतिः ॥ ८२ ॥
उतथ्यानुजो धिषणो गुरुश्चित्रशिखण्डिजः ।
वाचस्पतिः स्याद्बृहतीपतिर्वाग्मिनौ ॥ ८३ ॥

---

१ ५९ तावना नाम षट् ॥
२ ६० मृग तृष्णा नाम द्वयं ॥ झांझुआ भाषा ॥
३ ६१ सूर्यमंडल नाम चत्वारि ॥
४ ६२ सूर्यसारथी नामऽष्ट ॥
५ ६३ सूर्यघोडा नाम चत्वारि ॥
६ ६४ सूर्य पासेवाण नाम ॥
७ ६५ मंगल नाम दश ॥
८ ६६ बुधा नामऽष्ट ॥
९ ६७ बृहस्पति नाम एकाविंशतिः ॥

७४.२) रस्मि
७५.१) पादाउस्र
७७.२) मरीविका
८३.१) °सिखंडिनः

आङ्गिरसो द्वादशार्चिर्दीदिविः फल्गुनीभवः ।
प्रख्यामहामतिर्गौरो वाक्प्रचक्षाश्च गीरथः ॥ ८४ ॥
[1]शुक्रः काव्यः षोडशार्चिर्धिष्ण्यो दैत्यगुरुः कविः ।
भार्गवो भृगुरुशना मघाभवोऽप्य[2]थाऽसितः ॥ ८५ ॥
शनिः शनैश्चरः सौरिः क्रूरात्मा रेवतीभवः ।
महाग्रहः शतकर्मा मदः सप्तार्चिरित्यपि ॥ ८६ ॥
छायासुतो नीलवासाः क्रोडः पङ्गु[3]रथो तमः ।
स्वर्भानुस्तु भरणीभूः सैंहिकेयो विधुंतुदः ॥ ८७ ॥
उपप्लव उपरागो राहुः[4] केतुः शिखी पुनः ॥
अश्लेषाभूरूर्ध्वकचः आहिको[5]ऽथ ध्रुवः पुनः ॥ ८८ ॥
उत्तानपादजो ज्योतीरथो ग्रहाश्रयस्तथा ।
[6]अगस्तिर्मैत्रावरुणिराग्नेय आग्निमारुतः ॥ ८९ ॥
वातापिद्विडौर्वशेयः पीताब्धिः कलशीसुतः ।
दक्षिणाशारतिः विन्ध्यकूटोऽगस्त्यो घटोद्भवः ॥ ९० ॥
वारुणिस्तपनः क्राथिः सत्याग्निः मुनि[7]रस्य च ।
भार्या कौषीतकी लोपामुद्रा वरप्रदा तथा ॥ ९१ ॥
[8]मरीचिरत्रिः पुलस्त्योऽङ्गिराः पुलहः क्रतुः ।
वसिष्ठश्च महातेजाः सप्तमः परिकीर्तितः ॥ ९२ ॥
[9]सप्तर्षयस्तथा चि [23 b] [त्र] शिखण्डिनोऽभिधा द्वयम् ।
[10]पुष्पदन्तौ पुष्पवन्तावभिन्नोक्त्येन्दुभास्करौ ॥ ९३ ॥

---

१ ६८ शुक्रदेवता नाम दश ॥
२ ६९ शनैश्चर नाम चतुर्दश ॥
३ ७० राहु नामऽष्टौ ॥
४ ७१ केतु नाम पंच ॥
५ ७२ ध्रू [व] नाम चत्वारि ॥
६ ७३ अगस्ति नाम सप्तदश ॥
७ ७४ अगस्तिस्त्री नाम त्रयं ॥
८ ७५ सप्तरसी नाम ॥
९ ७६ सप्तर्षि एकोक्त्या नाम द्वयं ॥
१० ७७ सूर्यचंद्रमारा एकोक्त्या नाम द्वयं ॥

८४·१) आमिरशो for आङ्गिरसो
८५·२) गुरुदशना for भृगुरुशना
८७·२) स्वार्माणु
९१·२) कोपोतकी
९२·१) पुलदक्रुचुः

[1]य इन्दुसूर्ययो राहुग्रासः स ग्रह उच्यते ।
उपप्लव उपरागो[2]ऽथारिष्टं स्यादुपद्रवः ॥ ९४ ॥
अजन्यमस्त्रियामार्तिः उपलिङ्गं च पञ्चमम् ॥
समावुत्पातोपसर्गौ [3]वह्न्युत्पात उपाहितः ॥ ९५ ॥
[4]त्रिलिङ्गास्तारकास्ताराऽक्लीबो भज्योतिषी ग्रहः ।
उडुरपुमान् नक्षत्रं धिष्ण्यमृक्ष[5]मथाश्विनी ॥ ९६ ॥
अश्वयुगश्वकिनी च बालिनी दस्रदेवता ।
[6]यमदेवता द्वितीयं भरणी; [7]कृत्तिका पुनः ॥ ९७ ॥
बहुलाः बहूक्तावग्निदेवास्तृतीयकम् ।
[8]ब्राह्मी स्याद्रोहिणी; [9]मार्गो मृगशीर्षं मृगस्तथा ॥ ९८ ॥
चान्द्रमसं मृगशिरोऽस्त्रियां [10]स्युः पञ्चतारकाः ।
इल्वलाः स्त्री मृगशीर्षमस्तकस्थाश्च [11]कालिनी ॥ ९९ ॥
आर्द्रा रौद्री च; [12]अथादित्यौ यामकौ तु पुनर्वसू ।
[13]स्युः पुष्यतिष्यसिध्याश्च [च]तुर्थं गुरुदैवतम् ॥१००॥

---

१ ७८ ग्रहण नाम चत्वारि ॥
२ ७९ उपद्रव नाम सप्त ॥
३ ८० अग्निकृत उपद्रव नाम द्वयं ॥
४ ८१ सामान्यत तारा नाम नव ॥
५ ८२ अश्विनी नक्षत्र नाम पंच ॥
६ ८३ भरणी नाम द्वयं ॥
७ ८४ कृत्तिका नाम त्रयं ॥
८ ८५ रोहिणी नाम द्वयं ॥
९ ८६ मृगशिर नाम पंच ॥
१० ८७ मृगशिर ऊपरिला पांच तारा तेहनो नाम एकं ॥
११ ८८ आर्द्रा नाम त्रयं ॥
१२ ८९ पुनर्वसु नाम त्रयं ॥
१३ ९० पुष्य नाम चतुष्कं ॥

९४·१) इंद°, श्च for स
९५·१) आति for आर्ति
९७·१) देश्र° for दस्र

[1]अश्लेषा [अ]क्लीवः सार्प्पी च [2]बहूक्तौ स्त्री मघाः पुनः ।
पित्र्याः स्युः; [3]फाल्गुनी योनिदेवता [4]ऽर्यमदेवता ॥१०१॥
उत्तराफाल्गुनी; [5]हस्तः सोऽक्लीवः सूर्यदैवतः ।
[6]चित्रा त्वाष्ट्री; [7]तथा स्वातिरक्लीवोऽनिल [24a] देवतः ॥१०२॥
[8]राधा विशाखा चेन्द्राग्निदेवा; [9]मैत्री द्वितीयकम् ॥
अनुराधा; [10]ज्येष्ठा चैन्द्री; [11]मूलोऽस्त्री राक्षसः पुमान् ॥१०३॥
[12]जलदेवः पूर्वाषाढो; [13]उत्तराषाढाः तथा पुनः ।
वैश्वी स्यात्; [14]श्रवणोऽक्लीवो हरिदेवो ऽ[15]थ वासवी ॥१०४॥
धनिष्ठाश्रविष्ठे छल्ये; [16]शतभिषक् तु वारुणी ।
[17]अजदेवी पूर्वभाद्रपदा [18]उत्तरपूर्विका ॥१०५॥

---

१ ९१ अश्लेषा नाम द्वयं ॥
२ ९२ मघा नाम द्वयं ॥
३ ९३ पूर्वाफाल्गुनी नाम द्वयं ॥
४ ९४ उत्तराफाल्गुनी नाम द्वयं ॥
५ ९५ हस्त नाम द्वयं ॥
६ ९६ चित्रा नाम द्वयं ॥
७ ९७ स्वातिनाम द्वयं ॥
८ ९८ विशाखा नाम त्रयं ॥
९ ९९ अनुराधा नाम द्वयं ॥
१० १०० ज्येष्टा नाम द्वयं ॥
११ १०१ मूल नाम द्वयं ॥
१२ १०२ पूर्वाषाढा नाम द्वयं ॥
१३ १०३ उत्तराषाढा नाम द्वयं ॥
१४ १०४ श्रवण नाम द्वयं ॥
१५ १०५ धनिष्टा नाम द्वयं ॥
१६ १०६ शतभिषा नाम द्वयं ॥
१७ १०७ पूर्व भद्रपद् नाम द्वयं ॥
१८ १०८ उत्तर भद्रपद् नाम द्वयं ॥

१०२.२) सार्प्री, अतिल फल्गुनी योनि-देवताः १०३.१) चैंद्राग्नि° .२) चेंद्राय

भाद्रपदाऽहिर्बुध्नदेवा; [1]प्रोष्ठपदा इति ।
द्वयोर्नक्षत्रयोरेकं नाम; [2]पौष्ण्यं नपुंसके ॥१०६॥
रेवती; [3]चन्द्रकामिन्यो दाक्षायण्यः पुनः समाः ।
[4]मेषाद्या राशयस्तेषामुदयो लग्नमस्त्रियाम् ॥१०७॥

॥ इति सुराधिकारः ॥

[5]यात्याप्रेताः नारकाश्च परेता आतिवाहिकाः ।
[6]विष्टिराजूः स्त्रियामेतौ; [7]कारणा यातनापि च ॥१०८॥
तीव्रवेदना [8]ऽथाक्लीबो दुर्गतिर्नरकः पुनः ।
नारको निरयो [9]ऽथ स्याद्बलिवेश्म नपुंसकम् ॥१०९॥
रसातलं नागलोकोऽधोलोकः वडवामुखम् ।
पाताल [10]मथो विवरं रोकं निम्नं बिलं वपा ॥११०॥
अन्तरं शुषिरं रन्ध्रं छिद्रं निर्व्यथनं शुषिः ।
स्त्रीपुमानपरे रोपं कुहरं; [11]कुहरे भुवः ॥१११॥
[24 a] गर्त्तोऽक्लीबोऽवटः श्वभ्रमगाधोश्च (?) दरस्त्रिषु ।
[12]रत्नप्रभादिमाः सन्ति भुवः सप्त जिनागमे ॥११२॥

॥ इति नारकाधिकारः ॥

[13]पुरुषो मानवो भूस्पृक् मानुषो मनुजो नरः ।
मनुष्यः पुरुषो विट् ना मर्त्त्यः पञ्चजनः पुमान् ॥११३॥

---

१ १०९ पूर्वभद्र उत्तरभद्र एकोक्त्या नाम एकं ॥
२ ११० रेवती नाम द्वयं ॥
३ १११ इणरा लक्षण कहइछइ ॥
४ ११२ बारइ राशिरा नाम एकं ॥
५ ११३ नारका नाम पंच ॥
६ ११४ सामान्यत नरकवेदना द्वयं ॥
७ ११५ नरकतीव्रवेदना नाम त्रयं ॥
८ ११६ नरकगति नाम चत्वारि ॥
९ ११७ पाताल नाम षट् ॥
१० ११८ पातालछिद्र नाम त्रयोदश ॥
११ ११९ पृथ्वीविवर बोड नाम पंच ॥
१२ १२० नरक प्रमाण कहइछइ ॥
१३ १२१ मनुष्य नाम त्रयोदश ॥

१०८·१) पृष्टि°

११०·१) °लोकं

११३·२) पुरुषः, °जनाः

[1]द्विजक्षत्रियवैश्यशूद्राश्चतस्रो नरजातयः ।
[2]चातुर्वर्ण्यं; द्विजाः प्रोक्ताः पूज्यकाण्डे विशेषतः ॥११४॥
[3]अथ द्वितीयको वर्णो वर्ण्यते शास्त्रदृष्टितः ।
[4]राजन्यः क्षत्रियो बाहुसंभवः क्षत्रमस्त्रियाम् ॥११५॥
[5]भूपालो लोकपालो राट् प्रजापालः क्षमापतिः ॥
पार्थिवः पृथिवीशक्रो मूर्धाभिषिक्तभूभृतौ ॥ ११६ ॥
महीक्षिन्मध्यलोकेशो राजा [6]ऽथ मण्डलाधिपः ।
मध्यमः; [7]स भवेत्सम्राट् यो भूपान् शास्ति सर्वतः ॥ ११७ ॥
योऽधिपः सर्वदेशस्य योऽयाक्षीद्राजसूयकम् ।
[8]अधीश्वरश्चक्रवर्ती सार्वभौमोऽत्र भारते ॥ ११८ ॥
जिनागमेऽभवन्द्वादश ते भरतमुख्यकाः ।
[10]मान्धाता धुन्धुमारश्च हरिश्चन्द्रः पुरूरवाः ॥ ११९ ॥
भरतः कार्तवीर्यश्च षडेते चक्रवर्तिनः ।
लोकप्रसिद्धनामानि तेषामेवं यथाक्रमम् ॥ १२० ॥
[11]युवनाश्वजो मान्धाता; [12]धुन्धुमारो द्वितियकम् ।
कुवलाश्वो [13]ऽथ त्रिशङ्कुजो हरिश्चन्द्र इत्यपि ॥ १२१ ॥

---

१ १२२ च्यारि वर्ण कहइछइ ॥
२ १२३ इणकउ नाम एकं ॥
३ १२४ क्षत्रिय बीजउ वर्ण कहइछइ ॥
४ १२५ क्षत्रियवर्ण नाम चत्वारि ॥
५ १२६ राजा नाम दश ॥
६ १२७ सामान्य राजा नाम द्वयं ॥
७ १२८ बारह राजा मंडलाधिपति राजा नाम एकं ॥
८ १२९ चक्रवर्त्ती नाम त्रयं ॥
९ १३० जिनशासन चक्रवर्त्ति संख्या कहइछइ ॥
१० १३१ लोकप्रसिद्ध चक्रवर्त्ति नाम ॥
११ १३२ मांधाता नाम द्वयं ॥
१२ १३३ धुंधुमार नाम द्वयं ॥
१३ १३४ हरिश्चंद्र नाम द्वयं ॥

११६.२) भूभृत्
११७.२) सर्वंदे
११८.१) सर्वदशस्य
११९.१) भयन् for भवन्

[25a] [1]उर्वशीरमणो बौध ऐलो भूयः पुरूरवाः ।
[2]सर्वदमो भरतश्च शकुन्तलात्मजस्तथा ॥ १२२ ॥
दौष्यन्ति [3]रर्जुनः कार्त्तवीर्यो भुजसहस्रभृत् ।
हैहयो [4]ऽथ त्रिपृष्ठाद्या अचलप्रमुखा नव ॥ १२३ ॥
वासुदेववलदेवाश्वग्रीवादयः पुनः ।
प्रतिवासुदेवास्तेऽपि नव प्रोक्ता जिनागमे ॥ १२४ ॥
[5]जिनानामृषभादीनां वीरान्तानां महात्मनाम् ।
चतुर्विंशत्या त्रिषष्टिः शलाकापुरुषाः समे ॥ १२५ ॥
[6]रामो दशरथिः कौसल्यात्मज [7]स्तस्य कामिनी ।
जानकी मैथिली सीता धरणीतनया तथा ॥ १२६ ॥
वैदेही; [8]रामतनयौ कुशलवौ कुशीलवौ ।
अभिन्नोक्त्या [9]ऽथ सौमित्रिर्लक्ष्मणो; [10]वालिवालिनौ ॥१२७॥
इन्द्रसुतो [11]ऽथ सुग्रीव आदित्यनुसूरप्यथ ।
[12]मारुतिराञ्जनेयश्च हनुमानर्जुनध्वजः ॥ १२८ ॥
वज्रकङ्कटकेशरिसुतौ; [13]स्याद्दशकन्धरः ।
राक्षसो लङ्केशश्च पौलस्त्यो रावणस्तथा ॥ १२९ ॥

---

१ १३५ पुरूरवा ना [25·a] म चत्वारि ॥
२ १३६ भरत नाम चत्वारि ॥
३ १३७ कार्त्तवीर्य नाम चत्वारि ॥
४ १३८ वासुदेव-बलदेव-प्रतिवास-देवकी संख्या कहइछइ ॥
५ १३९ महापुरुष संख्या कहइ ॥
६ १४० रामचंद्र नाम त्रयं ॥
७ १४१ वासीना (सीता ?) नाम पंच ॥
८ १४२ रामचंद्रपुत्र एकोक्त्या नाम द्वयं ॥
९ १४३ लक्ष्मण नाम द्वयं ॥
१० १४४ वालि वानर नाम त्रयं ॥
११ १४५ सुग्रीव नाम द्वयं ॥
१२ १४६ हनुमंत नाम षट् ॥
१३ १४७ रावण नाम पंच ॥

१२२·१) उर्वसी° १२७·२) सौमित्र°
१२४·२) °देवास्तिपी १२९·२) राक्षशो
१२६·१) कौशल्यालज ·२) शीता

[1]मन्दोदरीसुतो मेघनादो रावणिरिन्द्रजित् ।
[2]युधिष्ठिरो धर्मपुत्रः कङ्कः शल्यारिरित्यपि ॥ १३० ॥
अजमीढोऽजातशत्रुः; [3]भीमो वकनिसूदनः ।
वृकोदरो मरुत्पुत्रः स्याद्धिडिम्बनिसूदनः ॥१३१॥
किर्मीरारिः कीचकारिः; [4]सुभद्रेशो धनंजयः ।
राधावेधी सव्यसाची किरीटी नन्तिमाख्रयः ॥१३२॥
ऐन्द्रिर्वृहन्नटो जिष्णुः स्युः पार्थार्जुनफाल्गुनाः ।
कपिध्वजो गुडाकेशो [25 b] योगी श्वेतहयो नरः ॥१३३॥
कृष्णपक्षश्चित्रयोधी विजयः कर्णजित्पुनः ।
बीभत्सुर्धन्वी चित्राङ्गसूदनो [5]ऽस्य रथः स्मृतः ॥१३४॥
नन्दिघोषो; [6]धनुर्गाण्डीवं गाण्डीवोऽस्त्रियौ मतौ ।
[7]सहदेवो ग्रन्थिकः स्यात्; [8]नकुलस्तन्तिपालकः ॥१३५॥
[9]माद्रेयाविमा[10]वितरे भीमार्जुनयुधिष्ठिराः ।
कौन्तेयाश्च; [11]द्वयेऽप्येते पाण्डवाः पाण्डवायनाः ॥१३६॥
पाण्डवेयाः [12]अथ कृष्णा द्रौपदी नित्ययौवना ।
याज्ञसेनी च सैरन्ध्री पाञ्चाली यज्ञवेदिजा ॥१३७॥

---

१ १४८ रावणपुत्र नाम चत्वारि ॥
२ १४९ युधिष्टिर नाम षट् ॥
३ १५० भीम नाम सप्त ॥
४ १५१ अर्जुन नाम त्रयोविंशति ॥
५ १५२ अर्जुनरथ नाम एक ॥
६ १५३ अर्जुनधनुष नाम द्वयं ॥
७ १५४ सहदेव नाम द्वयं ॥
८ १५५ नकुल नाम द्वयं ॥
९ १५६ नकुलसहदेव एकोक्त्या नाम एकं ॥
१० १५७ युधिष्टिरभीमार्जुन एकोक्त्या नाम एकं ॥
११ १५८ पंच पंडवारउ एकोक्त्या नाम त्रयं ॥
१२ १५९ द्रौपदी नाम सप्त ॥

१३१·२) हिडंवा°
१३३·२) गुडाकेशी
१३४·२) वीभत्सो
१३५·१) नंदघोषो
१३७·२) यज्ञवेदिता

[1]चम्पाधिपश्च राधेयः सूतार्कतनयोऽङ्गराट् ।
कर्ण [2]स्तस्य धनुः कालपृष्ठं भूपा इमे समे ॥१३८॥
[3]पृथुरादिराजो वैन्यः प्रसिद्धः शिवशासने ।
श्रेणिकाद्यास्तु कुमारपालान्ता जिनशासने ॥१३९॥
[4]राजवंश्यो राजवीजी [5]वंश्यो वीज्यश्च कथ्यते ।
वंशजाते [6]ऽथ सप्त स्युः प्रकृतयो यथाक्रमम् ॥१४०॥
[7]राजा मन्त्री मित्रं कोशः देशः कोटो वलं तथा ।
कथ्यते: प्रकृतयोऽपि समेऽपि पुरवासिनः ॥१४१॥
[8]या स्वदेशस्य चिन्ता स्याद्रक्षणे तन्त्रमुच्यते ।
[9]आवापः शत्रुदेशस्य संध्यादिगुणषटक [26a] तः ॥१४२॥
[10]तन्त्रं तथोपकरणं परिवर्हः परिच्छदः ।
परिस्यन्दः परिकरः परिवारः परिग्रहः ॥१४३॥
[11]भूपासनं भवेद्भद्रासनं; [12]स्वर्णमयं पुनः ।
सिंहासनं; [13]राजशय्या महाशय्या उभे समे ॥१४४॥

---

१ १६० कर्ण नाम राजा नाम पंच ॥
२ १६१ कर्णधनुष नाम एकं ॥
३ १६२ पृथु राजा नाम त्रयं ॥
४ १६३ राजवी [जी ?] नाम द्वयं ॥
५ १६४ राजवंश जाता नाम द्वयं ॥
६ १६५ राज्यरा सात अंग नाम सामान्यत एकं ॥
७ १६६ प्रकृतिका नाम ॥
८ १६७ सदेसरक्षणपोषणचिन्ता नाम एकं ॥
९ १६८ वइरीनी चिंता नाम एकं ॥
१० १६९ परिवार नामऽष्ट ॥
११ १७० नृपासन नाम एकं ॥
१२ १७१ स्वर्णमय सिंहासन नाम एकं ॥
१३ १७२ राजसय्या नाम द्वयं ॥

१३८·१) तनयोगराट्
१३९·१) पृथुरा आदिआजो
१४०·१) राजवाजी
१४२·१) स्वदेस्वास्य विंताः

[1]आतपवारणं छत्रं: [2]त्रिषु चमरचामरे।
प्रकीर्णकं रोमगुच्छो वालव्यजनमप्य [3]थ ॥१४५॥
स्थगीर्वतश्च (?) ताम्बूलकरकः; [4]कनकालुका।
भृङ्गारो [5]ऽथ पूर्णकुम्भो भद्रकुम्भः [6]पद्मासनम् ॥ १४६ ॥
पादपीठ [7]मथो मन्त्री सचिवः सामवायिकः।
अमात्यो धीसखो [8]ऽथ स्यादायुक्तो व्यापृतः पुनः ॥ १४७ ॥
कर्मसचिवो नियोगी; [9]प्राड्विवाकः स उच्यते।
यो द्रष्टा व्यवहाराणामक्षदर्शक इत्यपि ॥ १४८ ॥
[10]प्रधानानि महामात्राः; [11] सौवस्तिकपुरोहितौ।
पुरोधाः [12]दण्डी द्वारस्थः द्वास्थो वेत्रधरोऽपि च ॥ १४९ ॥
दौवारिकः प्रतीहारो क्षत्ता द्वाःस्थितिदर्शकः।
द्वारपालक उत्सारकः; [13]स्यादधिकृतः पुनः ॥ १५० ॥
अध्यक्षो [14]ऽथानीकस्थः स्यादङ्गरक्षकसंततौ ॥
[15]सूदा[ध्य]क्षः पौरोगवः सूपः सूदश्च बल्लवः ॥ १५१ ॥

---

१ १७३ छत्र नाम द्वयं ॥
२ १७४ चमर नाम पंच ॥
३ १७५ तांबूलभाजन नाम द्वयं ॥
४ १७६ कलसीया नाम द्वयं ॥
५ १७७ पूर्णकलश नाम द्वयं ॥
६ १७८ बाजोट नाम द्वयं ॥
७ १७९ मुहता नाम पंच ॥
८ १८० फुजदार नाम चत्वारि ॥
९ १८१ चउवटिया नाम द्वयं ॥
१० १८२ प्रधान नाम द्वयं ॥
११ १८३ पुरोहित नाम त्रयं ॥
१२ १८४ प्रोलीया नाम दश ॥
१३ १८५ उपरठाई नाम द्वयं ॥
१४ १८६ अंगरक्षक नाम एकं ॥
१५ १८७ सुआर नाम दश ॥

१४८.१) प्राड् विवाकः, .२) व्यव-हारिण°

१४९.१) °पुरोहित

१५०) wrongly numbered १५१

औदनिकः सूपकारो गुण आरालिकस्तथा ।
भक्तकारो [1]ऽथ भौरिकः यः कनकाध्यक्षो भवेत् ॥ १५२ ॥

[2]नैष्किको रूप्याध्यक्षश्च; [3]स्थानाध्यक्षस्तु स्थानिकः ।
[4]शौल्किकः शुल्काध्यक्षः स्यात् [26b] [5]देयं घट्टादि स्फुटम्
॥ १५३ ॥

स शुल्कोऽस्त्री; [6]धर्माध्यक्षो धर्माधिकरणी पुनः ।
धार्मिको; [7]हट्टाध्यक्षोऽधिकर्मिको; [8]दण्डनायकः ॥ १५४ ॥

सेनानीश्चतुरङ्गबलाध्यक्षः; [9]स्थागुरुः स च ॥
ग्रामेऽधिकृतो; [10]बहुषु ग्रामेषु गोप उच्यते ॥ १५५ ॥

[11]योऽन्तःपुराधिकारी स्यादन्तर्वंशिक उच्यते ।
अवरोधिको [12]ऽथो कोट्टपतिः स्याद्दण्डपाशिकः ॥ १५६ ॥

पुराध्यक्षः पौरिकोऽपि; [13]स भवेत्पारिकर्मिकः ।
क्षुद्रोपकरणानां योऽधिकारी [14]चावरोधनम् ॥ १५७ ॥

---

१ १८८ स्वर्णाधिकारी नाम द्वयं ॥
२ १८९ रूप्याधिकारी नाम द्वयं ॥
३ १९० ठाणादार नाम द्वयं ॥
४ १९१ दाणीलह चउडीया नाम द्वयं ॥
५ १९२ वाटमा थइवइसी राजनउ कर ली[26b]जइ त नाम एकं ॥
६ १९३ धर्माधिकारी नाम त्रयं ॥
७ १९४ हट्टाधिकारी नाम द्वयं ॥
८ १९५ सेनानायक नाम त्रयं ॥
९ १९६ साहणा नाम एकं ॥
१० १९७ ग्रामवृंदपति नाम एकं ॥
११ १९८ सामान्यतः कुब्जवामनादिक अंतेउराधिकारी नाम द्वयं ॥
१२ १९९ कोटवाल नाम चत्वारि ॥
१३ २०० आभरणवस्त्राधिकारी नाम एकं ॥
१४ २०१ अंतेउर नाम चत्वारि ॥ राजलोक भार्या ॥

१५२·२) उदनिकः रूपकारो
१५३·२) घटादि
१५४·२) अधिकर्णको
१५५·१) Hem. reads स्थायुको for स्थागुरुः
१५६·१) अंतर्वंशिक, ·२) °पासिकः

शुद्धान्तोऽस्त्रियामन्तःपुरमवरोध इत्यथ ।
[1]सौविदाः सौविदल्लास्ते ये चान्तःपुररक्षकाः ॥ १५८ ॥

स्थापत्याः कञ्चुकिनोऽपि कुब्जवामनमुख्यकाः ।
[2]षण्ढो वर्षवरश्चायमप्यन्तःपुरपालकः ॥ १५९ ॥

[3]जिघांसुः शात्रवः प्रत्यवस्थाताऽसहनो रिपुः ।
अभियातिः प्रत्यनीको दस्युर्द्वेषी द्विपन्नरिः ॥ १६० ॥

आरातिरहितोऽमित्रः पुमान् प्रत्यर्थिवैरिणौ ।
अभिमातिर्विपक्षो द्विट् सपत्नः परिपन्थिकः ॥ १६१ ॥

परिपन्थकः दुर्हृच्छत्रुः प्रतिपक्षः परस्तथा ।
विद्वेषो विरोधो वैरं;[4] मित्रं स्यात्सवयाः सखा ॥ १६२ ॥

सुहृत् सहचरः स्निग्धो वयस्यो[5] ऽजर्यसौहृदे ।
स्थान्मैत्री सौहार्दं सातपदीनं संगतं पुनः ॥ १६३ ॥

सख्य [27a] [6]मानन्दनं चाऽपृच्छनं सभाजनं तथा ।
[7]विषयादनन्तरो राट् शत्रु [8]र्मित्रमतः परम् ॥ १६४ ॥

---

१ २०२ अंतेउरराषणहार नाम चत्वारि ॥
२ २०३ षोजा नाम द्वयं ॥
३ २०४ वइरी नाम षड्विंशतिः ॥
४ २०५ वइर नाम त्रयं ॥
५ २०६ मित्र नाम सप्त ॥
६ २०७ मित्राई नाम सप्त ॥
७ २०८ मिलणा नाम त्रयं ॥
८ २०९ वइरी राजा नाम एकं ॥
९ २१० मित्र राजा नाम एकं ॥

१५८·१) स्त्रियांगंऽतः°
१५९·२) षंडे, °पुरी° for °पुर°
१६०·१) प्रहनो for सहनो
१६१·१) °रहिनो for °रहितो, °वैरिणो,
: सपत्त for सपत्न
१६२·१) दुर्हृत्, स्तेऽथो for स्तथा
१६३·१) सुहृत्, अर्जय ·२) सेगनं for संगतं wrongly numbered 162.
१६४·१) संभाजनं

[1]उदासीनः परतरः; [2]पार्ष्णिग्राहस्तु पृष्ठतः ।
[3]अनुरोधोऽनुवृत्तिश्च; [4]चरश्चारस्तु हेरिकः ॥ १६५ ॥
यथार्हवर्णः प्रणिधिर्मन्त्रविद् गूढपूरुषः ।
अवसर्पो स्पशो वार्तायनः; [5]प्रत्ययितास्त्रिषु ॥ १६६ ॥
आप्तो; [6]गृहपतिः सत्री; [7]दूतः संदेशहारकः ।
[8]गुणाः संध्यादयः षट् च तेषामर्थः क्रमादयम् ॥ १६७ ॥
[9]संधिरेकत्वकरणं; [10]स्वस्थानात्परमण्डले ।
